VĪṆĀLAKṢAṆA

By

PARAMEŚVARA

and

VĪṆĀPRAPĀṬHAKA

Works on Indian Music

Edited by

J. S. PADE, M.A,

Bhandarkar Prizeman,

Research Officer,

Oriental Institute, M. S. University of Baroda.

Published with the subsistence grant of the Sangeeta Natak Akadami,

New Delhi.



ORIENTAL INSTITUTE,

BARODA

1959

Printed by Ramanlal J. Patel, Manager, The Maharaja Sayajirao University of Baroda Press (Sadhana Press), Near Palace Gate, Palace Road, Baroda and published on behalf of the Maharaja Sayajirao University of Baroda by Dr. Bhogilal J. Sandesara, Director, Oriental Institute, Baroda

Price Rs. 3=50 nP.

Copies of this work Can be had from :—

Secretary,
Sangeet Natak Akadami,
70 Regal Buildings,
New Delhi.

FOREWORD

It gives me great pleasure to introduce to the students of Indian music two small works *viz.*, (1) Vīṇālakṣaṇa of Parameśvara edited from a single worn-out palm leaf manuscript in grantha script and (2) Vīṇāprapāṭhaka edited from a single paper manuscript in Devanāgarī script, both preserved in the library of the Oriental Institute.

Vīṇālakṣaṇa with Vīṇāprapāṭhaka is indeed a valuable addition to our printed texts on ancient Indian music especially because texts devoted to Vīṇā are very few in Sanskrit and Vīṇālakṣaṇa is unique among them as it exclusively deals with Vīṇā and its fingering.

It is really a difficult task to edit such a text from a single manuscript. But Shri J. S. Pade has done it with great care and has given necessary comparative data in his scholarly Introduction and footnotes.

The Sangeet Natak Akadami, New Delhi, was pleased to sanction a grant of Rs. 10,000/- for publication of the following six volumes on music, dance and dramatics from Mss. preserved in this Institute. Accordingly, the following works have been undertaken for publication in the Gaekwad's Oriental Series of the M. S. University of Baroda.

(1) Rāgatattvavibodha of Śrīnivāsa,
(2) Saṅgītacūḍāmaṇi of Kavicakravarti Jagadekamalla.
(3) Rasakaumudī of Śrīkaṇṭha.
(4) Rāgamālā of Meṣakarṇa, Rāgamālā of Jīvarājadīkṣita, and Rāgamālā of Saṅkarṣaṇa.
(5) Nṛtyādhyāya of Aśokamalla,
(6) Vīṇālakṣaṇa of Kaviśārdūla Parameśvara.

Out of these Rāgatattvavibodha and Saṅgītacūḍāmaṇi were published as Nos. 126 and 128 of the G. O. Series and Vīṇālakṣana along with Vīṇāprapāṭhaka is published here as no. 131 of the same series.

I take this opportunity to express our thanks to the Sangeeta Nataka Akadami for the generous grant given for publication of such rare works on Indian Music.

B. J. SANDESARA
Director.

CONTENTS

॥ श्रीः ॥

॥ वीणालक्षणम् ॥

॥ परमेश्वरविरचितम् ॥

INTRODUCTION

The text of Vīṇālakṣaṇa is based upon a single ms. deposited in the library of the Oriental Institute, Baroda. The details of the ms. are as follows :—

1 Place of deposit : Baroda, Oriental Institute.
2 Acc. No. : 10010(a).
3 Title : Vīṇālakṣaṇam.
4 Author : Parameśvara.
5 Date : Undated.
6 Folios : 6.
7 No. of lines in each folio : 7.
8 No. of letters in each line : 45.
9 Material : Palm-leaf.
10 Script : Grantha.
11 Style : Written in one uniform handwriting.
12 Size : 15″ × 1″.
13 Condition : Worn out and moth-eaten.

The mss. of this work are very rare and are not found recorded even in the Catalogus Catalogorum of Aufrecht.

2. Out of 106 verses of Vīṇālakṣaṇa nearly 74 verses have been found quoted in the Bharata Koṣa compiled by Śrī M. Rāmakṛṣṇa Kavi Tirupati-1951. All those quotations have been utilised for the study and reconstruction of the text; and the variants are all noted in the foot-notes.

3. The learned compiler of Bharata Koṣa appears to have merely copied out verses of Vīṇālakṣaṇa as he found them in his own ms. without giving his corrective suggestions wherever necessary. The following instance will be sufficient to prove the above statement.

4. Bharata Koṣa P. 629 reads Vīṇālakṣaṇa IV. 3 as follows :—

ध्रुवे च त्रिपुटे सप्त चतुर्दश हठे ध्रुवे ॥
आदावष्ट चतुस्त्वेके मठ्ठे झम्पे कला दश ॥

This verse lays down the mātrās of the eight famous Tālas. Rūpaka Tāla is wanting in this text while the word ध्रुवे standing for ध्रुवताल appears twice *i.e.* in a and b. Dhruva Tāla consists of fourteen mātrās; and therefore, the reading of the word ध्रुवे in b is correct while that in a is absurd; as it does not consist of seven mātrās. The ms. of Vīṇālakṣaṇa rightly reads षड्रूपे for ध्रुवे च which means that Rūpaka Tāla consists of six mātrās. The scribe possibly could not understand the meaning of the word षड्रूपे and consequently must have replaced

it with the words भ्रुवे च in the ms. without caring for the sense. The compiler of Bharata Kośa copied it faithfully without suggesting any correction.

5. The ms. utilised for preparing this edition is moth-eaten with the result that many words are missing in the text. All the 74 verses quoted in Bharata Koṣa have been utilized in filling up the lacunas caused by moths. Lacunas in the remaining 32 verses have been filled up by me with exact words very few of which may possibly be corrected with the help of other mss. of the text.

6. The variants according to Bharata Koṣa have been given in the foot-notes. The reading of the ms. has been retained in the text wherever it is found correct. The variants according to Bharata Koṣa have been suggested in the brackets wherever the text of the ms. has been found corrupt.

The author:

7. The author of this small work on Vīṇā is Parameśvara. He has given his own account in the last two verses of the text. According to it he had descended from the Saṁkṛti Gotra of the Bhāradvāja Gaṇa according to Kātyāyana and Laugākṣī, and was proficient in Jyotiṣa, Śilpa, Āgama, Mantra, Tantra and Draviḍa Tantra. He had realised the Kuṇḍalinī Suṣumnā also. The colophons of the fifth and sixth chapters indicate that he was a poet and possessed the title of Kaviśārdūla. He appears to be a Śaiva as he has praised Lord Śiva in the form of Vīṇādhara Dakṣiṇāmūrtī in the introductory verse.

8. According to Bharata Koṣa he was the resident of Cidambara and flourished in the 18th century. (*cf.* Bharata Koṣa P. 355—कालः १७०० दक्षिणे चिदम्बरप्रान्तवासी। Introduction Page XXV. " It is a modern work written about 1750 A.D. ") The compiler of Bharata Koṣa has not given any evidence to support his statement. The name of the author indicates that he must have been a Malbārī Brāhmaṇa. The name Parameśvara is more common in Malabar than any where else.

9. Parameśvara, the author of Goladīpikā, the commentator of Āryabhaṭīyam, Mahābhāskarīyam, Laghubhāskarīyam, Laghumānasam etc. is different from our author as he belonged to Bhārgava Gotra according to Nīlakaṇṭha who in his Bhāṣya on Āryabhaṭīya observes :—अश्वत्थग्रामजो भार्गवः परमेश्वरः। etc. and lived about 1430 A.D. (*cf.* Goladīpikā of Śrī Parameśvara, Ed. by T. Gaṇapati Śāstrī—Trivandrum 1916—Preface.)

10. No more information about the author is available. There is no evidence in this work to prove his proficiency in Jyotiṣa, Śilpa, Āgama etc. The present text consisting of 106 verses fails to support his title Kaviśārdūla. His weakness in composition and grammar is displayed in the text at many places. However he has expressed the whole subject in a lucid and simple style.

11. The author has mentioned the names of six authors in the text, namely 1 Agastya, 2 Hanumān, 3 Nārada, 4 Yājñavalkya, 5 Citrasena and 6 Tumburu.

1 Nothing is known about Agastya's contribution to Saṁgīta.

2 Hanumān is the author of Hanumatsaṁhitā or Āñjaneyasaṁhitā.

3 Pañcamasārasaṁhitā, Nāradīya Śikṣā and Nāradasaṁhitā are ascribed to Nārada.

4 Yājñavalkya is the author of Yājñavalkya-Śikṣā.

5–6 About the contribution of Citrasena and Tumburu nothing is known. Tumburu is known to be the author of Nāṭakageyalakṣaṇa.

Out of these six authors three namely Āñjaneya, Nārada and Tumburu are mentioned in Saṅgītaratnākara as authorities on Saṅgīta. (Saṅgītaratnākara I. 1. 15.20). The names of Agastya, Hanumān, and Nārada are quoted in our text to support the statement that salvation can be obtained by the knowledge of playing on Vīṇa. The names of Yājñavalkya, Nārada, Citrasena, and Tumburu are quoted in connection with Kalyāṇī mela Rāga ; Bhairavī mela Rāga and Toḍī mela Rāga ; Pantuvarāli mela Rāga ; and Sāmanta mela Rāga respectively. The citation of these names and the way in which they are cited do not show any sign of their influence on the present text and the author. The author has treated the subject of Vīṇā, its fingering, 15 Melas, 34 Rāgas etc. as it was in practice in his own days in South India which has been famous for her eminence in fine arts. (*cf.* तत्र दाक्षिणात्यास्तावद्बहुनृत्तगीतवाद्याः कैशिकीप्रायाश्चतुरमधुरललिताङ्गाभिनयाश्च । तद्यथा । ....

दक्षिणस्य समुद्रस्य तथा विन्ध्यस्य चान्तरे ॥
ये देशास्तेषु युञ्जीत दाक्षिणात्यां तु नित्यशः ॥

Nāṭyaśāstra, Vol. II. (G. O. S. ed.), 13.41.

The text :

12. Texts merely devoted to Vīṇā are very rare in Sanskrit literature. Mānasollāsa, Saṅgītaratnākara, Rasakaumudī, Caturdaṇḍiprakāśikā etc. have treated the topic. But Vīṇālakṣaṇa of Parameśvara exclusively deals with Vīṇā and as such is a unique work on the subject. Works like Vīṇāprapāṭhaka are mere compilations. The importance of this work in Saṅgīta literature can be very well proved by the fact that Śrī M. Rāmakṛṣṇa Kavi, compiler of Bharata Koṣa, had to quote 74 verses out of 106 in his Koṣa as authoritative on the subject.

13. The work is divided into six chapters. The first chapter begins with the salutation of Lord Śiva in the form of Vīṇādhara Dakṣiṇāmūrti who is worshipped as a great teacher of music both instrumental and vocal. The author has further described Vīṇā having seven strings. The four upper strings

used for playing the music are significantly called Mandra, Madhyama, Tāra and Anumandra respectively. The three strings below are useful for twanging with the little finger for the purpose of the drone and for rhythm. There are 24 Sārīs or frets placed underneath the playing strings.

14. The svaras are seven *viz.* 1 Ṣaḍja, 2 Ṛṣabha, 3 Gāndhāra, 4 Madhyama, 5 Pañcama, 6 Dhaivata and 7 Niṣāda. Out of these seven svaras Ṛṣabha is of three kinds—1 Dviśruti, 2 Catuḥśruti and 3 Ṣaṭśruti; Gāndhāra is of three kinds—1 Śuddha-gāndhāra, 2 Antara-gāndhāra and 3 Sādhāraṇa-gāndhāra; Madhyama is of two kinds—1 Śuddha Madhyama and 2 Prati Madhyama; Dhaivata is of three kinds—1 Dviśruti, 2 Catuḥśruti and 3 Ṣaṭśruti; and Niṣāda is of three kinds—1 Śuddha, 2 Kaiśya and 3 Kākali. Thus, there are 16 svaras. They are accommodated on the 12 Sārīs or frets as shown below :—

(1) Sa, (2) Ri-2, (3) Ri-4, Ga-Śuddha, (4) Ri-6, Ga-Antara, (5) Ga-Sādhāraṇa, (6) Ma-Śuddha, (7) Prati Madhyama, (8) Pa, (9) Dha 2, (10) Dha-4, Ni-Śuddha, (11) Dha-6, Ni-Kaiśya, (12) Ni-Kākali. The 24 Sārīs are useful for Āroha and Avaroha of the above mentioned 16 Svaras.

15. The second chapter mainly deals with the classification of Rāgas. Rāgas having all the seven svaras are known as Sampūrṇa and are of one variety only. Those having six svaras are called Ṣāḍava which can be of six varieties by omitting six svaras excepting Ṣaḍja. Those having five svaras are known as Auḍava and are of 15 varieties by omitting two svaras out of six at a time. These three types of Rāgas are again sub-divided into nine varieties *viz.* 1 Sampūrṇa-Sampūrṇa, 2 Sampūrṇa-Ṣāḍava, 3 Sampūrṇa-Auḍava, 4 Ṣāḍava-Sampūrṇa, 5 Ṣāḍava-Ṣāḍava, 6 Ṣāḍava-Auḍava, 7 Auḍava-Sampūrṇa, 8 Auḍava-Ṣāḍava, 9 Auḍava-Auḍava.

16. The author has described eight famous Tālas in the third chapter. They are as follows :—

Name of the Tāla	*Jāti*	*Mātrās*
1. Dhruva (Āḍā cautāla)	Caturasra	14
2. Maṭṭha (Sulphāka)	,,	10
3. Rūpaka (Dādarā)	,,	6
4. Jhampa	Miśra	10
5. Triputa	Tryasra	7
6. Haṭha (Cautāla)	Khaṇḍa	14
7. Ekatāla	Caturasra	4
8. Āditāla	,,	8

Each of these eight Tālas is of five varieties *viz.*

1.	Catasra	having Laghu =	4	mātrās.
2.	Tryasra	„	3	„
3.	Khaṇḍa	„	5	„
4.	Miśra	„	7	„
5.	Saṅkīrṇa	„	9	„ .

Our author has, however, described each Tāla only in its well-known common variety.

17. In the fourth chapter the author has described the fingering of the Vīṇā and the ten kinds of Gamakas namely 1 Honmu, 2 Pratīhāsa, 3 Simhāvalokana, 4 Māru, 5 Viṭi, 6 Nokku, 7 Paṭṭa, 8 Orikā, 9 Gamaka, 10 Sphuritam. Out of these 10 names, (1) Māru or Jāru, (2) Nokku, (3) Paṭṭa or Paṭṭu are Telugu names; while Honmu, Viṭi and Orikā are to be identified.

18. The author has described 15 important melas in the fifth chapter. They are :—1 Mālavagaula, 2 Nāṭa, 3 Śrīrāga, 4 Kalyāṇī, 5 Śaṅkarābharaṇa, 6 Bhairavī, 7 Kāmbhojī, 8 Pantuvarālī, 9 Mukhārī, 10 Varālī, 11 Toḍī, 12 Vegavāhinī, 13 Bhūpāla, 14 Sāmanta and 15 Gaula.

19. The sixth chapter deals with Rāgas derived from the various melas. The author has here treated only 35 popular Rāgas derived from the eight important melas. They are as follows :—

	Mela	*Rāgas*
1.	Mālavagaula :—	1 Nādanāmakriyā, 2 Reguptī, 3 Rāmāmanoharī, 4 Saurāṣṭra, 5 Mālavī.
2.	Bhairavī :—	1 Rītigaula, 2 Ānandabhairavī, 3 Jayantī.
3.	Kāmbhojī :—	1 Nāṭa-Ārabhī (Kurañjī), 2 Dvijāvantī, 3 Suraṭī, 4 Śuddhasāverī, 5 Mohana, 6 Yadukula, 7 Kedāragaula.
4.	Śrīrāga :—	1 Kāpi, 2 Madhyamāvatī, 3 Uśāni, 4 Aṭhāṇā, 5 Vasanta.
5.	Toḍī :—	1 Ābhīrī, 2 Punnāgavarālī.
6.	Kalyāṇī :—	1 Sāraṅga.
7.	Vegavāhinī :—	1 Velāvalī.
8.	Śaṅkarābharaṇa :—	1 Nīlāmbarī, 2 Navaroja, 3 Byāgaḍā, 4 Bilaharī, 5 Kedāra, 6 Kurañjī, 7 Kannaḍā, 8 Ārabhī, 9 Udayacandrikā, 10 Pūrṇacandrikā.

20. Thus it will be seen that the author has described all the relevant topics in this small work of 106 verses exclusively devoted to Vīṇā. The work is highly useful for the beginners in the subject.

21. Before concluding I must thank Dr. B. J. Sāṇḍesarā, the Director of the Oriental Institute and Dr. U. P. Śāha, the Deputy Director of the Institute for the facilities and every sort of help given by them in editing this work. I am also thankful to Paṇḍita Veṅkaṭaramaṇa Śāstrī, of the Oriental Institute, Baroda for preparing the transcript of the worn out manuscript of Vīṇālakṣaṇa. I am also obliged to Paṇḍita Rāghavan Nambiyāra and Paṇḍita Veṅkataramaṇa Śāstrī of the Oriental Institute for their help in filling up the lacunas in the last two verses by suggesting exact readings. My thanks are also due to the Manager of the University Press for his hearty co-operation in printing this work very neatly and carefully.

J. S. PADE.

॥ श्रीः ॥

परमेश्वरविरचितं

वीणालक्षणम् ।

प्रथमोल्लासः ।

(गु)रवे नमः ।

विद्यावल्लभमानन्दमयं देशिकदेशिकम् ॥
अर्धनारीश्वरं देवं वीणाधरमुपास्महे ॥ १ ॥

I अर्धनारीश्वरे नारीस्वरूपं सरस्वत्या वर्तत इति विद्यावल्लभत्वमुक्तं हस्तयोश्च वीणापुस्तक परिग्रहो वर्णितः ।

वीणाधरदक्षिणामूर्तिः ।

प्रतिमालक्षणानि ।

तदेव वामपादेनोत्कुटि(त्कट)कासनसंयुतम् ॥
पूर्वहस्तद्वयोर्वीणाधृतं युक्त्या द्विजोत्तम ॥
शेषं प्रागिव कर्तव्यमेतद्वीणाधरं भवेत् ॥

अंशुमद्भेदागमे पञ्चसप्ततितमपटले ।

ऊर्ध्वाधो मध्यकटकौ तस्यां सर्पकरावुभौ ॥
वीणा तु दक्षिणे वामेऽदक्षिणे कटकः स्थितः ॥
दक्षिणे कटकं चोरुस्थितायां विनिवेशयेत् ॥

उत्तरकामिकागमे एकपञ्चाशत्तमपटले ।

तदेव वामपादेनोत्कुटिकासनसंयुतम् ॥
पूर्वहस्तद्वये वीणा चेत्तद्वीणाधरं स्मृतम् ॥

शिल्परत्ने द्वाविंशपटले ।

कटकं दक्षिणं हस्तमधोमुखं तदुच्यते ॥
वामहस्तं तु कटकमूर्ध्ववक्त्रं तदुच्यते ॥
तन्त्रीं निवेशयेदूरुकाग्रे दक्षिणपादके ॥

नादे ल्य(वीणादेश्च)परिज्ञानान् मोक्ष इत्येव सूचि(त्रि)तम् ॥
अन्तरं (रा) (मोक्ष)दा न स्यादिति वीणामुपाददे ॥ २ ॥
प्रमाणीकर्तुमेवेदं धत्ते सर्पाग्निपुस्तकम् ॥
इत्येवागस्त्यहनुमन्नारदादिभिरादृतम् ॥ ३ ॥
तस्माद् वीणा(परिज्ञानान् मो)क्ष एव न संशयः ॥
इत्यत्र भगवानेव प्रमाणं परमेश्वरः ॥ ४ ॥
ध्यायं ध्यायं महाविद्यां नादब्रह्ममयां(यीं) हृदि ॥
संग्रहीष्यामि वीणाया ल(क्षणं शा)स्त्रसम्मतम् ॥ ५ ॥

वामहस्तस्य कटके सव्यहस्तं तथोपरि ॥
ऊरुवाद्यं त्रिमात्रं तु करकोर्ध्वे युगाङ्गुलम् ॥
दण्डायाममिति प्रोक्तं विस्तारं तु द्विमात्रकम् ॥
वा(ला)बुवक्त्रं तु षण्मात्रमुत्सेधं तु तदर्धकम् ॥
एतदेव विशेषं तु शेषं पूर्वोक्तवद्भवेत् ॥
दक्षिणामूर्तिरेवं स्याच्छृणु मन्मथविग्रहम् ॥

पूर्वकारणागमे एकादशपटले ।

Elements of Hindu Iconography. Vol. II P. II. Pages 145-146.

2 cf. वीणावादनतत्त्वज्ञः श्रुतिजातिविशारदः ॥
तालज्ञश्चाप्रयासेन मोक्षमार्गं नियच्छति ॥

याज्ञवल्क्यस्मृतिः III. 4-115.

3 हनुमान्— हनुमत्संहिताकारः । हनुमत्संहिता आञ्जनेयसंहितेत्युक्तं रघुनाथभूपेन (भरतकोशः—पृ. ७६७)
आञ्जनेयो मातृगुप्तो रावणो नन्दिकेश्वरः ॥ संगीतरत्नाकरः--१.१.१७.
इति संगीतरत्नाकरे सङ्गीतविशारदत्वेनोल्लेखः ।

नारदः—पञ्चमसारसंहिता, नारदीयशिक्षा, एते नारदकृते । नारदेन गान्धारग्रामस्वरूपं सुष्ठूक्तम् । एष ग्रामः स्वर्गलोक एव प्रयोगेऽस्तीति बहूनां मतम् । (भरतकोशः पृ. १२८) वायुर्विभावसू रम्भाऽर्जुननारदतुम्बराः ॥ इति संगीतरत्नाकरे (१.१.१५) निर्देश उपलभ्यते ।

नारदसंहिता—Music. Quoted by Nārāyaṇadeva Oxf. 201a. Nāradasaṁhitāyām Catvāriṁśacchatarāganirūpaṇa Burnell 60b. Pañcamasārasaṁhitā L 322. 540.

Catalogus Catalogorum Vol. I. P. 287.

4 परमेश्वरः—शङ्करो ग्रन्थकारश्च ।

5 भ. को. P. 630.—नादब्रह्ममयीम्—मयटष्टित्वात् टिड्ढाणञ् (पा. ४.१.१५) इति ङीप् ।

सुषुम्नानाडिसदृशे वीणादण्डे फणान्वि(यि)ते ॥
तन्त्रीसप्तकमेतासां मध्ये त्रिकमधोगतम् ॥ ६ ॥

---

6 भ. को. P. 240, 630; reads (a) सुषुम्न for सुषुम्ना, (b) फणायिते for फणान्विते । सुषुम्ना :—

प्रपञ्चसारः । प्रथमः पटलः ।
ऊर्ध्वं तु मरुता नुन्नं तस्मादपि फलद्वयात् ॥
उभयात्मिक्यधोवृत्ता नाडी दीर्घा भवेदृजुः ॥ ७९ ॥
अवाङ्मुखी सा तस्याश्च भवेत् पक्षद्वये द्वयम् ॥
नाड्योस्तत्सन्धिबन्धाः स्युः सप्तान्या नाड्यो मताः ॥ ८० ॥
ततो या प्रथमा नाडी सा सुषुम्नेति कथ्यते ।
या वामेडेति सा ज्ञेया दक्षिणा पिङ्गला स्मृता ॥ ८१ ॥
या वाममुष्कसम्बन्धा सा श्लिष्यन्ती सुषुम्नया ॥
दक्षिणवृक्कमाश्रित्य धनुर्वक्रा हृदि स्थिता ॥ ८२ ॥
वामांसजत्र्वन्तरङ्गा दक्षिणां नाडिकामियात् ॥
तथा दक्षिणमुष्कोत्था नाडी या वामरन्ध्रगा ॥ ८३ ॥
अन्या धमन्यो या प्रोक्ता गान्धारी हस्तिजिह्विका ॥
सपूषालम्बुषा चैव यशस्विन्यपि शङ्खिनी ॥ ८४ ॥
कुहूरिति च विद्वद्भिः प्रधाना व्यापिका स्तनौ ॥
काचिन्नाडी बहिर्वक्त्रा या मातुर्हृदि बध्यते ॥ ८५ ॥
यथा तत्पुष्टिमाप्नोति केदार इव कुल्यया ॥
मातुराहाररसजैर्धातुभिः पुष्यते क्रमात् ॥ ८६ ॥

शब्दकल्पद्रुमः—सुषुम्ना—
मेरुदण्डबाह्ये इडापिङ्गलानाडीमध्यस्थनाडीविशेषः । यथा ।
मेरोर्बाह्यप्रदेशे शशिमिहिरशिरे सव्यदक्षे निषण्णे ॥
मध्ये नाडी सुषुम्ना त्रितयगुणमयी चन्द्रसूर्याग्निरूपा ॥
इति षट्चक्रभेदः ।

शब्दकल्पद्रुमः— वीणा—
सा तु सप्ततन्त्रीयुक्ता चेत् परिवादिनीत्यमरः । ध्वनिमाला इति जटाधरः । वल्लकी विपञ्चिका इति शब्दरत्नावली । घोषवती कण्ठकूणिका । यथा महाभारते । (९-१३४-१४)

सप्तर्षयः सप्त चाप्यर्हणानि
सप्ततन्त्री प्रथिता चैव वीणा ॥

तद्भेदा यथा । शिवस्य वीणा लम्बी । सरस्वत्याः कच्छपी । नारदस्य महती । गणानां प्रभावती । विश्वावसोर्बृहती । तुम्बरोः कलावती । चाण्डालानां

कण्ठोलवीणा चाण्डालिका च । तस्याङ्गादीनां नामानि यथा । तस्याः कायः कोलम्बकः । तस्या निबन्धनमुपनाहः । तस्या दण्डः प्रवालः । तस्याः प्रान्तवक्रकाष्ठं ककुभः प्रसेवकश्च । तस्या मूले वंशशलाका कलिका कूणिकाऽपि च । तस्या वादनं कोणः । इति हेमचन्द्रादयः ।

सौन्दर्यलहरी—सुधाधारासारैः — श्लो. १०

लक्ष्मीधरव्याख्या । अतश्च शिरस्थितसहस्रदलकमलान्तर्गतश्रीचक्रात्मकशशिबिम्बमध्यस्थिताया भगवत्याश्चरणकमलनिर्णेजनजलैः सुधामयैः साधकस्य सकलशरीरं सम्प्लाव्य पुनः भुजङ्गरूपेण आधारकुण्डं प्रविश्य सुषुम्नामवष्टभ्य सा भगवती स्वपितीति । यथोक्तं वामकेश्वरमहातन्त्रे ।

भुजङ्गाकाररूपेण मूलाधारं समाश्रिता ॥
शक्तिः कुण्डलिनी नाम बिसतन्तुनिभाऽशुभा ॥
अशुभा क्षणप्रभा विद्युन्निभेत्यर्थः ।

मूलकन्दं फणाग्रेन द । कमलकन्दवत् ॥
मुखेन पुच्छं संगृह्य ब्रह्मरन्ध्रं समाश्रिता ॥
पद्मासनगतः स्वस्थो गुदमाकुञ्चय साधकः ॥
वायुमूर्ध्वगतिं कुर्वन् कुम्भकाविष्टमानसः ॥
वाय्वाघातवशादग्निः स्वाधिष्ठानगतो ज्वलन् ॥
ज्वलनाघातपवनाघातैरुन्निद्रितोऽहिराट् ॥
रुद्रग्रन्थिं ततो भित्त्वा विष्णुग्रन्थिं भिनत्त्यतः ॥
ब्रह्मग्रन्थिं च भित्त्वैव कमलानि भिनत्ति षट् ॥
सहस्रकमले शक्तिः शिवेन सह मोदते ॥
सा चावस्था परा ज्ञेया सैव निर्वृतिकारणम् ॥ इति ॥

संगीतरत्नाकर :—

अस्ति कुण्डलिनी ब्रह्मशक्तिराधारपङ्कजे ॥
आब्रह्मरन्ध्रमृजुतां नीतेयममृतप्रदा ॥ १. २. १२०

कलानिधि :—टीका ।

तस्मिन्नेवाधारपङ्कजे कुण्डलिनीत्यन्वर्थतया सर्परूपिणी ब्रह्मशक्तिर्ब्रह्मणोऽसङ्गोदासीनस्य परमात्मनः कर्तृत्वाद्युपहिताकारिण्यविद्याशक्तिः । सैव मूर्तिमती कुटिलाकारतया कुण्डलिनीत्युच्यते । आब्रह्मरन्ध्रं ब्रह्मरन्ध्रं नाम सुषुम्नाया अग्रं शिरसि सहस्रदलचक्रमध्यगं तत्पर्यन्तम् । ऋजुतां गतेति । गुरूपदिष्टप्रकारेण यमनियमादिक्रमेण वायोरिडापिङ्गलयोः सञ्चारं निरुध्य तेन वायुना स वायुना (?) ब्रह्मग्रन्थो (न्थौ) सुषुम्नामूलरन्ध्राच्छाद(दि)नीं फणामपसार्य तत्र प्रवेशितेन तेन ब्रह्मविष्णुग्रन्थीनां क्रमाद्विभेदे सति कुण्डलिनी चाष्टवक्रतां विहाय यदा ऋजुतां प्राप्यते ।

चतुष्क(मूर्ध्वमा)गस्थं तासां संज्ञां विवृण्महे ॥
आरभ्य पित्तलं(लां) तन्त्रीं मन्द्रमध्यमतारकाः ॥ ७ ॥

अनुमन्द्रो विशेषः स्यान्नादकालविभेदने ॥
मन्द्रस्तु (मन्दरं ब्रू)ते मध्यमो मध्यमस्वरः ॥ ८ ॥

तारस्तूच्चस्वरं भू (ब्रू)यादनुमन्द्रोऽतिमन्दरः ॥
अधोगतं त्रिकं तालज्ञानार्थमुपयुज्यते ॥ ९ ॥

चतुर्विंशतिसं(ख्यास्तु सार्यस्) त(त्र) स्वरान्तरे ॥
एतेष्व (तास्व)ष्टाष्टभेदेन त्रिस्थायिध्वनिभेदतः ॥ १० ॥

लूतेन तन्तुजालस्य तत्र जीवो भ्रमत्ययम् ॥
सुषुम्नया ब्रह्मरन्ध्रमारोहत्यवरोहति ॥ १४८ ॥
जीवः प्राणसमारूढो रज्वां कोल्हाटिको यथा ॥
सुषुम्नां परितो नाड्यः कन्दादाब्रह्मरन्ध्रतः ॥ १४९ ॥
कन्दीकृत्य स्थिताः कन्दं शाखाभिस्तन्वते तनुम् ॥
ताश्च भूरितरास्तासु मुख्याः प्रोक्ताश्चतुर्दश ॥ १५० ॥
सुषुम्नेडा पिङ्गला च कुहूरथ सरस्वती ॥
गान्धारी हस्तिजिह्वा च वारणा च यशस्विनी ॥ १५१ ॥
विश्वोदरा शङ्खिनी च ततः पूषा पयस्विनी ॥
अलम्बुषेति तत्राद्यास्तिस्रो मुख्यतमा मताः ॥ १५२ ॥
सुषुम्ना तिसृषु श्रेष्ठा वैष्णवी मुक्तिमार्गगा ॥
कन्दमध्यस्थिता तस्या इडा सव्येऽथ दक्षिणे ॥ १५३ ॥
पिङ्गलेडापिङ्गलयोश्चरतश्चन्द्रभास्करौ ॥
क्रमात् कालगतेर्हेतुः सुषुम्ना कालशोषिणी ॥
सरस्वतीकुहूश्चास्ते सुषुम्नायास्तु पार्श्वयोः ॥ १५४ ॥

(भ. को.— भरतकोश :— रामकृष्णकविसम्पादितः -- तिरुपतिः — १९५१).

7 भ. को. P. 240, 630, reads (c) पित्तला-पित्तलां for पित्तलं। (d) तारगाः for तारकाः ।

8 „ „ „ „ (b) कार for काल ।

9 „ „ „ „ (a) ब्रूयात् for भूयात् । (b) मन्द्रं for मन्दरः । (c) तालं for ताल ।

10 „ „ „ „ (a) संख्याकाः for संख्यास्तु । (c) एतास्वष्टा for एतेष्वष्टा ।

तत्र तन्त्रीचतुष्केऽपि स्वरा (स्थानं) षण्णवतिः स्मृतम् ॥
द्वात्रिंशत् स्थानम(धिकं) ली(नं तत्रैव सारिषु) ॥ ११ ॥

षड्जो (ड्ज) ऋषभगान्धारमध्यपञ्चमधैवतं (ताः) ॥
निषादश्चेत्यमी संज्ञा (सप्त) (वीणा)त्र(ल)यगताः स्वराः ॥ १२ ॥
षड्जं मयूरो वदति गावो मभ(रम्भ)न्ति च(र्षभम्) ॥
(अजादिकास्तु) गान्धारं क्रौञ्चो नन्द(द)ति मध्यमम् ॥ १३ ॥
पुष्पसाधारणे काले पिकः कूजति पञ्चमम् ॥
अश्वस्तु दै(धै)वतं रौति निषादं रौति कुञ्जरः ॥ १४ ॥

---

11 भ. को. P. 240, 630, reads (b) स्थानं for स्वराः । स्फुटम् for स्मृतम् ।
12 ,, ,, ,, ,, (a) षड्जर्षभ for षड्जोऋषभ । (b) धैवताः for धैवतम् । (c) सप्त for संज्ञा । (d) लय for त्रय ।

13-14 cf. षड्जं मयूरो वदति गवास्तु(गाव) ऋषभभाषिणा(णः) ॥
अजादिकास्तु गान्धारं क्रौञ्चः क्वणति पञ्चमम् ॥
पुष्पसाधारणे काले पिकः कूजति पञ्चमम् ॥
धैवतं हेषते वाजिः(जी) निषादं बृंहि(ह)ते गजः ॥
नारदीयशिक्षा
Theory of Indian music by Bishan Sarup. Page 25.

षड्जं वदति मयूरो गावो रम्भन्ति चर्षभम् ॥
अजाविके तु गान्धारं क्रौञ्ची वदति मध्यमम् ॥
पुष्पसाधारणे काले कोकिलो वक्ति पञ्चमम् ॥
अश्वस्तु धैवतं वक्ति निषादं वक्ति कुञ्जरः ॥
नारदीयशिक्षा O. I. ms No. 11826.

षड्जो वेदे शिखण्डिः स्यात् ऋ(ह)षभः स्यादजामुखे ॥
गवा(गावो) रम्भान्ति गान्धारं क्रौञ्चश्चैव तु मध्यमम् ॥
कोकिलः पञ्चमो ज्ञेयो निषादं तु वदेद्गजः ॥
अश्वश्च धैवतो ज्ञेयः स्वराः सप्त विधीयते(न्ते) ॥
याज्ञवल्क्यशिक्षा ८-९.

मयूरचातकच्छागक्रौञ्चकोकिलदर्दुराः ॥
गजश्च सप्त षड्जादीन् क्रमादुच्चारयन्त्यमी ॥
संगीतरत्नाकरः १. ३. ४८.

तन्त्रीनादस्तु षड्जः स (स्यात् स्थानेषु ऋषभादि) काः ॥
ऋषभस्त्रिविधः प्रोक्तो द्विचतुःषट्च्छ्रुतिक्रमात् ॥ १५ ॥

गान्धारोऽपि त्रिधा शुद्धान्तरसाधारणक्रमात् ॥
चतुःश्रुत्यृषभे शुद्धः ष(ट्)च्छ्रुतावन्त(रःस्थितः) ॥ १६ ॥

(साधा)रणाख्यगान्धारः पृथगात्मतया स्थितः ॥
पृथगेव द्विधा शुद्धमध्यमप्रातिमध्यमौ ॥ १७ ॥

पञ्चमोऽथ त्रिधा धैवं(वो) त्रि(द्वि)चतुःषट्च्छ्रुतिक्रमात् ॥
(निषा)दस्त्रिविधः शुद्धकैश्यकाकल्यभेदतः ॥ १८ ॥

चतुःश्रुतौ धैवते तु निषादः शुद्ध इष्यते ॥
(षट्च्छ्रुतौ) धैवते कैश्यनिषादोऽन्यः (पृथक् स्थितः) ॥ १९ ॥

ततः (तार)षड्जस्वरश्चेति द्वादशामी विभेदतः ॥
एते (प्रो)क्तक्रमेणैव द्वादशाधोमुखाः स्थिताः ॥ २० ॥

आरोहा(द)वरोहाच्च सं(ज्ञामेषां वि)वृणमहे ॥
सप्तस्वराणां भेदेन वीणायां षोडश स्वराः ॥ २१ ॥

---

15 भ. को. P. 240, 630, reads (a) स्यात् for स । (b) ऋषभादिशाः for ऋषभादिकाः ।

16 भ. को. P. ,, ,,

17 ,, ,, ,,

18 ,, ,, ,, reads (b) द्विचतुः for त्रिचतुः ।

19 ,, ,, ,, ,, (a) चतुःश्रुति for चतुःश्रुतौ ।

20 ,, ,, ,, ,, (a) तार for तत । स्वराः for स्वरः । (d) थिता & धिताः for स्थिताः ।

21cd ,, ,,

आरोह(प्रक्रम)द्वयभेदेन द्वात्रिंशद्भेद उच्यते ॥
तन्त्रीचतुष्वो(ष्केऽपि षड्जपञ्चमावष्ट) गीयते (भेदिनौ) ॥
तत्राप्रसिद्धस्थानानि कतिचिद् वर्जितानि तैः ॥ २२ ॥

॥ इति वीणालक्षणे स्वरस्थानकथनं नाम प्रथमोल्लासः ॥

22ab भ. को. P. 240, 630. (a) प्रक्रम for आरोह । (c) चतुष्के for चतुष्वो । (d) भेदिनौ for गीयते ।
cd.

Between cd and ef भ. को. reads as follows:—P. 240, 630.

मध्यमः षोडशविधः चतुर्विंशतिभेदिनः ॥
निषादर्षभगान्धारधैवता इति वैणिकैः ॥
अष्टाविंशोत्तरशतमाहत्य भवति ॥
माहत्येति प्रकीर्तितः ॥

22 ef. भ. को. P. 240 reads (b) च for तैः ।

१ षड्जः । २ ऋषभः द्विश्रुतिः । ३ ऋषभः चतुःश्रुतिः । ४ ऋषभः षट्श्रुतिः । ५ गान्धारः शुद्धः । ६ गान्धारः अन्तरः । ७ गान्धारः साधारणः । ८ मध्यमः शुद्धः । ९ प्रतिमध्यमः । १० पञ्चमः । ११ धैवतः द्विश्रुतिः । १२ धैवतः चतुःश्रुतिः । १३ धैवतः षट्श्रुतिः । १४ निषादः शुद्धः । १५ निषादः कैश्यः १६ निषादः काकली । इति वीणायां षोडश स्वराः ।

तत्र शुद्धगान्धारस्य चतुःश्रुत्यृषभे, अन्तरगान्धारस्य षट्श्रुत्यृषभे शुद्धनिषादस्य चतुःश्रुतिधैवते कैश्य निषादस्य च षट्श्रुतिधैवते स्थानं विद्यते इति षोडशस्वराणां वीणायां द्वादश स्थानानि । आरोहावरोह-क्रमेण चतुर्विंशतिस्थानानि भवन्तीति चतुर्विंशतिसार्यो वीणायाम् ।

१ तन्त्री—स्थानानि २४ स्वराः—३२

४ तन्त्रीषु — ,, ९६ ,, —१२८

एवं तन्त्रीचतुष्टये स्वराणां ३२ स्थानानि सारिषु लीनानि ।

द्वितीयोल्लासः ।

एवमुक्तक्रमस्तारमन्द्रयोरेव युज्यते ॥
मध्यम(तन्त्रीना)दस्तु पञ्चमः श्रूयते ततः ॥ १ ॥

तत्र द्विश्रुतिधैवाद्या मध्यमास्ताः (द्याः) प्रकीर्तिताः ॥
(यथा म)ध्यमतन्त्र्यां स्युरनुमन्द्रे तथा स्वराः ॥ २ ॥

ततस्तन्त्रीद्वयं तन्त्रीद्वयं तुल्यमिति स्थितिः ॥
मन्द्रस्तु(न्द्रात्तु)नीचषष्ठाभ्यामुच्चषष्ठानुसारिणी ॥ ३ ॥

परि(वादयते) तन्त्रीं केवलं पञ्चमस्वरा ॥
अनुमन्द्रा पञ्चमस्य नीचकालविभेदिनी ॥ ४ ॥

कालत्रयस्तु(यं तु) वीणाया हस्ताभ्यासानुसारतः ॥
द्रुतमध्यविलम्बाख्याः सर्वे तालान्विताः स्वराः ॥ ५ ॥

स्थायितन्त्रीकालभेदाद् ध्वनिभेदस्त्रिधा मतः ॥
स्वराणां षोडशानां तु वर्ज्यावर्ज्यक्रमाक्रमात् ॥ ६ ॥

(ये हि) भेदाःप्रसक्तास्ते गीतप्रस्थानदर्शिताः ॥
ध्वनित्रयविभेदस्तु सर्वरागेषु गीयते ॥ ७ ॥

सप्तस्वरान्विताः केचिद् रागाः सम्पूर्णसंज्ञकाः ॥
षट्स्वरैरन्विता रागाः कतिचित् षाडवाभिधाः ॥ ८ ॥

पञ्चस्वरयुता रागाः केचिदौडवसंज्ञकाः ॥
इ(त्येवं) त्रिविधा रागाः परस्परसमन्वयात् ॥ ९ ॥

आरोहे चावरोहे च जाता नवविधाः पुनः ॥
वक्रानुवक्रभेदेन केचिद्रागाः प्र(व)र्तिताः ॥ १० ॥

---

9 १ सम्पूर्णः । २ षाडवः । ३ औडुवः । – त्रिविधा रागाः ।

10 १ सम्पूर्णः षाडवः । २ सम्पूर्ण औडवः । ३ षाडव औडवः । ४ षाडवः सम्पूर्णः । ५ औडवः सम्पूर्णः । ६ औडवः षाडवः । इति नवविधा रागाः ।

षड्जस्य सर्वव्याप्तित्वान्नास्त्येवा(स्य) विवर्जनम् ॥
ततः सम्पूर्ण एकः स्यात् षा(डवः षड्वि)धः स्मृतः ॥ ११ ॥
ओ(औ)डवस्तु पुनः पञ्च(दशभेदो विनिश्चितः) ॥
सङ्कराणां विभेदस्तु विस्तरान्नात्र लिख्यते ॥ १२ ॥

॥ इति वीणालक्षणे स्वरविशेषकथनं नाम द्वितीयोल्लासः ॥

---

11 १ सरिगमपध । २ सरिगमपनि । ३ सरिगमधनि । ४ सरिगपधनि । ५ सरिमपधनि । ६ सगमपधनि । इति षाडवभेदाः ।

12 १ समपधनि । २ सरिपधनि । ३ सरिगधनि । ४ सरिगमनि । ५ सरिगमप । ६ सगपधनि । ७ सगमधनि । ८ सगमपनि । ९ सगमपध । १० सरिमधनि । ११ सरिमपनि । १२ सरिमपध । १३ सरिगपनि । १४ सरिगपध । १५ सरिगमध । इति औडवप्रकाराः ।

तृतीयोल्लासः ।

अथ वक्ष्यामि (तालानां लक्षणं शास्त्रसम्मतम्) ॥
तालः सप्तविधः प्रोक्तो वीणायां (शास्त्रपारगैः) ॥ १ ॥

ध्रुवो(मण्ठो रूपक)श्च (झम्पा त्रि)पुटमेव च ॥
हठतालोऽप्येकतालोऽथादितालोऽतिरिच्यते ॥ २ ॥

(द्रुतं) मात्राद्वयं प्रोक्तं तस्य चार्धमनुद्रुतम् ॥
ध्रुवताले (लघुश्चैको द्रुतं चैकं लघुद्वयम्) ॥ ३ ॥

(तद्वा)चकं चतुर्मात्रालघुत्रय(मितीरितम्) ॥
मध्ये(ण्ठे ताले) द(द्रुत)श्चैकं चतुर्मात्रालघुद्वयम् ॥ ४ ॥

चतुर्मा(त्रालघु)स्त्वेको द्रुत चै(तश्चै)कोऽपि **रूपके** ॥
(सप्त)मात्रालघुजं (**घुर्झम्**)**पे** द्रु(तं चैकम)नुद्रुतम् ॥ ५ ॥

त्रिपुटे तु त्रिमात्रात् क (त्रः स्याल्) लघुरेको द्रुतद्वयम् ॥
पञ्चमात्रालघुद्वन्द्वं **हठताले** द्रुतद्वयम् ॥ ६ ॥

---

1 ध्रुवो मठ्यो रूपकश्च झम्पा त्रिपुट एव च ॥
अटतालश्चैकतालः सप्ततालाः प्रकीर्तिताः ॥
भरतकल्पलता । भरतकोशः P. 300.

3	ध्रुवतालः --	चतुरस्रः —	लघुः १ । द्रुतम् १ । लघुद्वयम् २ ।			
			४ । २ । ८	=	१४ मात्राः ।	
4	मण्ठतालः —	,, —	द्रुतम् १ । लघुद्वयम् ।			
			२ । ८	=	१० मात्राः ।	
5	रूपकतालः —	,,	लघुः १ । द्रुतम्–१ ।			
			४ । २	=	६ मात्राः ।	
	झम्पतालः —	मिश्रः —	लघुः १ । द्रुतम् १ । अनुद्रुतम् १ ।			
			७ । २ । १	=	१० मात्राः ।	
6	त्रिपुटतालः —	त्र्यस्रः —	लघुः १ । द्रुतद्वयम् २ ।			
			३ । ४	=	७ मात्राः ।	
	हठतालः —	खण्डः —	लघुद्वयम् । द्रुतद्वयम् ।			
			१० । ४	=	१४ मात्राः ।	

चतुर्मात्रालघुस्त्वेक (एक)तालस्य लक्षणम् ॥
आदिताले चतुर्मात्रालघुरेको द्रुतद्वयम् ॥ ७ ॥

ध्रुव(रूप)कतालादिरूपास्तु चतुरस्रकाः ॥
त्रिपुटं त्र्यस्रजातिः स्यान् मिश्रजातिस्तु जंप(झम्प)कः ॥
हठतालः खण्डजातिः संकरस्त (स्तु वि)शिष्यते ॥ ८ ॥

॥ इति वीणालक्षणे तालनिर्णयकथनं नाम तृतीयोल्लासः ॥

---

7 एकतालः — चतुरस्रः — लघुः १ ।
४ = ४ मात्राः ।

आदितालः— चतुरस्रः — लघुः १ । द्रुतद्वयम् २ ।
४ । ४ = ८ मात्राः ।

चतुर्थोल्लासः ।

तत् (तर्ज)न्या (स्फोट)नं सर्वस्वरेषु परिकल्पितः (तम्) ॥
ऊर्ध्वं पूर्वमधः पश्चादित्येवं क्रमशो भवेत् ॥ १ ॥

कनिष्ठिकासो(स्फोटनजः) स्फोटः स द्रुत(बोध)कः ॥
प्रवर्तते च ताला(दा)वित्येवं स्फोट(लक्षणम्) ॥ २ ॥

षड्रूपे त्रिपु (टे) भ (सप्त) चतुर्दश हठे ध्रुवे ॥
आदावष्ट चतु(स्त्वे)के म(ट्ठे) जंपे(झम्पे) कला दश ॥ ३ ॥

नास्त्यधस्ताडनेस्फो(ट) ऊर्ध्वा(ध्वे)स्फोटानुगो भवेत् ॥
(क्षि)प्रं स्फोटद्व(यं झ)प(म्पे) द्रुतानुद्रुतबोधकम् ॥ ४ ॥

संयुक्ताक्ष(रका)ले समध्यमाङ्गुलिताडनम् ॥
एकस्वरस्य द्वित्वादौ त (तत्संख्य)स्य ताडनम् ॥ ५ ॥

वीणायां गमकानां तु भेदो दशविधः स्मृतः ॥
हो (न्मुः स्थानेषु) तर्जन्या स्तम्भनं मध्यमोत्प्लवः ॥ ६ ॥

---

1 भ. को. P. 629 reads (a) तर्जन्या for तत् न्या । (b) कल्पितम् for कल्पितः ।

2 „ „ „ (a) कनिष्ठास्फोटनाख्यातः ।

3 „ „ „ (a) ध्रुवे च for षड्रूपे meaningless. (d) झम्पे for जम्पे । रूपे रूपकताले षड् मात्राः । त्रिपुटे त्रिपुटताले सप्त मात्राः । हठे हठताले ध्रुवे ध्रुवताले च चतुर्दश मात्राः । आदौ आदिताले अष्ट मात्राः । एके एकताले चतुः चतस्रो मात्राः । मट्ठे मण्ठताले झम्पे झम्पताले दश कलाः मात्राः ।

4 „ „ „ (b) ऊर्ध्वे for ऊर्ध्वा । (c) झम्पे for झम्प ।

5 „ „ „ (a) तु for स (d) संख्यं स्व for संख्यस्य ।

6 „ „ „ (b) ततः for स्मृतः । हेम्मु for होंन्मुः ।

अवरोहे प्रतीहा(सं) मध्यमोत्प्लवनं (विदुः) ॥
मध्यमोत्प्लवने प्येवमेकस्थानापसर्पणम् ॥ ७ ॥

सिंहावलोकनं नाम तद्वदेवावरोहते ॥
क्षिप्रापसर्पणं मारुरारोहे शोभते स्फुटम् ॥ ८ ॥

अवरोहापसर्पस्तु विटिरित्युच्यते तथा ॥
तन्त्र्यां तु मध्यमाङ्गुल्या स्फो (टो)नोकुर्मट्टः (मृदुः) स चेत् ॥ ९ ॥

स एव (चेद् द)डा(ढा)स्फोटः पट्टः पट्टरवो भवेत् ॥
ओरिका स्वरभेदाय स्थाने तन्त्र्यपकर्षणम् ॥ १० ॥

स्थाने तु गमकं नाम तन्त्रीक(म्पः) पुनः पुनः ॥
स्फुरितं तन्त्रिनि(र्जनी)स्तम्भो मध्यमोत्(प्ल)वनं तदा ॥ ११ ॥

किञ्चिच्च मध्यमास्फोटे (होन्मु) नोक (कू)भयोपमम् ॥
इत्येवं तु व (चमत्का)रो रागालापे प्रवर्तते ॥ १२ ॥

तत्र तत्र विशेषः स (कल्प)नीयः सुबुद्धिभिः ॥
स्वरक्रमः स्यादारोहे व्युत्क्रमस्त्ववरोहणम् ॥ १३ ॥

केषाञ्चिदत्र रागाणां वक्रा नाम गतिर्यथा ॥
क्वचित् स्वरमुपक्रम्य (तद्द्विती)यं प्रताड्य च ॥ १४ ॥

7	भ. को.	P. 629	reads	
8	,,	,,	,,	(b) रोहणे for रोहने । (c) जारुः for मारुः । (d) शोभने for शोभते ।
9	,,	,,	,,	(d) नोकुर्विदुः for नोकुर्मट्टः ।
10	,,	,,	,,	(a) ट्ढा for ट्डा । (b) पट्टुः पट्टु for पट्टः पट्ट । (c) आरिका for ओरिका ।
11	,,	,,	,,	(c) तर्जनी for तन्त्रिनी ।
12	,,	,,	,,	(a) स्फोटो for स्फोटे । (b) होन्नुनोक्कू for होन्मुनोक. —पमः for पमम् ।
13	,,	,,	,,	(a) तु for स । (d) व्युत्क्रमं त्वव— for व्युत्क्रमस्त्वव ।
14	,,	P. 629, 581	,,	(a) तत्र for अत्र । (c) कश्चित् for क्वचित् ।

पुनश्च प्रथ(मं) प्राप्य तृतीयमनुधावति ॥
श्रुतिरित्युच्यते मेलस्त्वन्यतन्त्रीस्वरान्त(रम्) ॥
युक्तन (क्तं ना)म दृढस्पर्शः किञ्चित् कर्षणपूर्वकः ॥ १५ ॥

॥ इति वीणालक्षणे अङ्गुलि(प्रहार)च(म)त्कारकथनं नाम चतुर्थोल्लासः ॥

---

15 abcd भ. को. P. 629, 581 reads (d) स्वरान्तरे for स्वरान्तरम् ।
ef. „ P. 629 „ (e) युक्तं नाम for युक्तनम ।

पञ्चमोल्लासः ।

तेषां वक्ष्यामि रागाणां केषाञ्चिल्लक्षणं स्फुटम् ॥
तत्तत्प्रा(देशिकैम्)तत्तन्नामभिर्भेदसंयुतैः ॥ १ ॥

ये स्वरास्त्रिविधास्ते स्युर्ब्रह्मविष्णुशिवान्विताः ॥
एवं भेदाय सर्वत्र पर्यालोच्यं मनीषिभिः ॥ २ ॥

षड्जादिधेनुहर (मेष) सुमध्यपञ्च-
(ब्र)ह्मा(श्च)रुद्र(ग)जषड्जमथावरोहे ॥
तद्व्युत्क्रमो भवति **मालवगौलरागे**
सम्पूर्णनाम्नि बहुकल्पनया (नु) रागः ॥ ३ ॥

बर्हीशधेनुगिरिशाजसुमध्यपञ्च-
काकल्यमल्पहरि(रेव)मथावरोहे ॥
गान्धारवर्जमपि राजति **नाटरागे**
सम्पूर्णषाडवगणे गणितः स **पूर्वैः** ॥ ४ ॥

षड्श्चतुःश्रुतिवृषोऽन्तरमेषशुद्ध-
मध्यः पिकस्तदनु कैश्यनिषाद एव ॥

---

2 भ. को. P. 637 ब्रह्मा शुद्धस्वरः । ब्रह्मपर्यायशब्दैः शुद्धस्वर उच्यते । विष्णुशब्देन विष्णुपर्यायशब्दैश्च चतुःश्रुतिकरिधौ अन्तरगान्धारः कैशिकनिषादश्चोच्यन्ते । शिवशब्देन शिवपर्यायशब्दैश्च षट्श्रुतिरिधौ साधारणगान्धारः काकलिनिषादश्चोच्यन्ते ।

3 भ. को. P. 637, 489 reads (d) नाम for नाम्नि ।
सः । रिः ६ । गः । मः । पः । धः ६ । निः काकली । सम्पूर्णः ।

4 „ „ „ 315 reads (d) तु for स ।
सः । रिः ६ । गः साधारणः । मः । पः । धः अल्पः । निः काकली । अवरोहे गो वर्ज्य इति सम्पूर्णषाडवः ।

5 „ „ „ 681 reads (b) मध्यौ for मध्य । (d) धैकेन & धैवेन for धेःवेन ।

श्रीराग एवमथ वक्रगतिस्तु मेषे
धेन्वे (धैवे)न वर्जिततया स तु षाडवाख्यः ॥ ५ ॥

बर्हीं (च)तुर्वृष(ह)राजविरुद्धमध्य-
पञ्चाच्युताश्व(श्व)हरकुञ्जरमेवमेव ॥

कल्याणिराग इति रम्यमनेकभङ्ग्या
सम्पूर्णमेव परिनन्दति **याज्ञवल्क्यः** ॥ ६ ॥

यः **शङ्कराभरणराग** इहापि षड्ज-
युक्ताच्युतोक्षशिवगान्धरशुद्धमध्यम् ॥

पञ्चार्धयुक्तहरि(धैव)तरुद्रदन्ती-
त्येवं क्रमाक्रमसमं कथयन्ति पूर्णम् ॥ ७ ॥

या **भैरवीह** त (तु) मयूरमुरारिधेनु-
तच्छागशुद्धतरमध्यमाश्वि (मपञ्चमाश्व) ॥

हर्यश्वकैशिकनिषादमिदं समानं-
सम्पूर्णजा(तिरि)ति गायति **नारदो**ऽपि ॥ ८ ॥

काम्भोजिराग इति बर्हिणविष्णुधेनु-
साधारणाजशुभमध्यपिकाच्युताश्वाः ॥

सः । रिः ४ । गः अन्तरः । मः । पः । निः कैशिकी ।
(धो लुप्तः)

6 भ. को. P. 637, 124 reads (b) च्युताश्व for च्युताश्व । कुञ्जर एवमेव for कुञ्जरमेवमेव ।
सः । रिः ४ । गः साधारणः । मः प्रतिमध्यमः । पः । धः ४ । निः काकली । सम्पूर्णः ।

7 „ „ 637, 652 reads: (b) रागमिहापि for राग इहापि । (c) पञ्चार्थ for पञ्चार्ध । सः । रिः ४ । गः साधारणः । मः । पः । धः ४ । निः काकली । सम्पूर्णः । पञ्चमोऽत्र इत्यर्धशब्देन द्योत्यते ।

8 „ „ 637, 445 reads (a) तु for त । सुरारि for मुरारि wrong । (b) मध्यमपञ्चमाश्व for मध्यमाश्वि ।
सः । रिः ४ । गोऽन्तरः । मः । पः । धः ४ । निः कैशिकी । सम्पूर्णा ।

तत्रावरोह उदयत्यपि कैश्यदन्ती
तद्गण्यते जगति षाडवपूर्णजातिः ॥ ९ ॥

केक्यादिधेनुशिवमेषविरुद्धमध्य-
पञ्चादिधैवतमहेशनिषादमेवम् ॥

सर्वत्र तुल्यमिति **पत्ता(न्तु)वराल(लि)रागे**
सम्पूर्णजातिरिति गायति **चित्रसेनः** ॥ १० ॥

केकी चतुःश्रुतिवृ(षोऽ)न्तरमेषशुद्ध-
क्रौञ्च(श्राव)नप्रियचतुर्हयकैश्यदन्ति ॥

आरोहणे त्वजनिषादविसर्जनं स्यात्
तत् स्यान् (तस्मान्) **मुखारि**शिव (रिय)मौडवपूर्णजातिः ॥ ११ ॥

बर्ह्यादिधेनुविधिमेषविरुद्धमध्य-
पञ्चादिधैवशिवदन्ति तथोभयत्र ॥

पूर्णाभिधे सह (बहुल)कल्पनया **वराली-
रागे** चमत्कृतिमनेकविधां वदन्ति ॥ १२ ॥

---

9 म. को. P. 638, 130 reads : (b) ताश्वा for ताश्वाः । (c) उदितेत्यपि for उदयत्यपि । सः । रिः ४ । गः साधारणः । मः । पः । धः ४ । षाडवः आरोहे, अवरोहे निः कैशिकीति सम्पूर्णः । षाडवसम्पूर्णः ।

10 ,, ,, 638, 355 reads. (b) पञ्चाधि for पञ्चादि । पन्तुवरालि for पन्तवरात । सः । रिः । गः साधारणः ।प्रतिमध्यमः । पः । धः । निः काकली । सम्पूर्णः । आदिधैवतः शुद्धधैवतः ।

11 ,, ,, 638, 497 reads. (d) तस्मान् for तत् स्यात् । रिय for शिव । सः । रिः ४ । गः अन्तरः । मः । पः । धः ४ । निः कैशिकी । आरोहे गनी वर्ज्यौ । औडवसम्पूर्णः ।

12 ,, ,, 638, 585 reads. (b) पञ्चाधि for पञ्चादि । तदो for तथो । (c) बहुल-सह । सः । रिः । गः । प्रतिमध्यमः । पः । धः । निः काकलिः । सम्पूर्णः ।
On page 638 the verse is read as **cdab.** ।

आद्यादिमोक्षहरिगान्धरशुद्धमध्या
विध्यश्वकैशिकनिषादमिदं समानम् ॥
गायन्ति **नारदमुखा** इह **तोडिरागे**
काचित्कप(ञ्चम)युतोऽपि स षाडवाख्यः ॥ १३ ॥

सद्य (स्यान्नील)कण्ठविधिधेनुहराजशुद्ध-
मध्यं पिकाच्युतहयाच्युत(कुञ्जरं) च ॥
आरोहणे गज(म) पा (स्य तु वे) ग (वा)हि-
रा(न्या)ख्यान (त राग इह षाडव)पूर्णजातौ ॥ १४ ॥

भूपालरागे शिखिधातृधेनु-
कृष्णाजपञ्चादितुरङ्गमे(वम्) ॥
समानमाभात्युभयत्र तस्मात्
स्या(दौ)डवेऽयं रमणीयगा(नः) ॥ १५ ॥

सामन्तनामनि मयूरषड्डुक्षरुद्र-
गान्धारशुद्धतरमध्यमकोकिलाख्यम् ॥
गोविन्दवाजिपुरभिद्(ग)जमे(व)तुल्यः
सम्पूर्णजातिरिति गायति **तुम्बुरुः** सः ॥ १६ ॥

---

13 भ. को. P. 638, 256 reads. (a) मध्य for मध्या ।
सः । रिः । गः अन्तरः । मः । धः । निः कैशिकः । षाडवः ।
पञ्चमः क्वचित् ।

14 ,, ,, 638, 635 reads. (a) स्यान्नीलकण्ठ for सद्यकच्ठ । (d) न्याख्यानराग for राख्यानराग । जातिः for जातौ ।
सः । रिः । गः साधारणः । मः । पः । धः ४ । निःकैशिकी ।
आरोहे निः वर्ज्यः । षाडवसम्पूर्ण; ।

15 भ. को. P. 638, 442 reads (c) सवाऽम् for समानम् । (a) औडुवो for औडवे ।
सः । रिः । गः अन्तरः । पः । धः । औडवः ।

16 ,, ,, 638, 719 reads (c) तुल्यं for तुल्यः ।
सः । रिः ६ । गः साधारणः । मः । पः । धः ४ । निः
काकली । सम्पूर्णः ।

बर्ह्यादिधेनुसकृदीश्वरमेषशुद्ध-
मध्याः (ध्यं) पिको हरनिषाद उदेति गौले ॥
सन्त्यज्य मेषमवरोहति वैणिकैस्तु
तत् औ(षा)डवौडुवगणे परिगण्य गीतम् (तः) ॥ १७ ॥

प्रसिद्धमेलकर्तारो राजरागा इमे पुनः ॥
एतेषु मिलितान् कांश्चिद् रागान् वक्ष्याम्यनन्तरम् ॥ १८ ॥

॥ इति श्रीकविशार्दूलेन परमेश्वरेण विरचिते वीणालक्षणे मेलकर्तृकथनं नाम पञ्चमोल्लासः ॥

---

17 भ. को. P. 638, 187 reads (a) समं for सकृत्। Not acceptable सकृदीश्वरमेष-एकवारमारोहे साधारणो गः। (b) मध्यं for मध्याः। मयेति गौले for उदेति गौले। (d) षाडव for औडव।

सः। रिः। गः साधारणः। मः। पः। निः काकली। धः सर्वथा लुप्तो गोऽवरोहे वर्ज्यः। षाडवौडवः।

18 ,, ,, 638, reads (a) प्रसिद्धाः for प्रसिद्ध। (b) रागराजा for राजरागा।

षष्ठोल्लासः ।

एक(वं) सम्मिलिता रागा बहवः सन्ति साम्प्रतम् ॥
तद्व्युत्पत्त्यै वक्रवर्ज्यस्थायिभेदान् प्रकाशये ॥ १ ॥
नादनामक्रियारागः समारोहेऽजवर्जितः ॥
अर्धश्रुतिसमायुक्तस्ततः षाडवपूर्णजः(कः) ॥ २ ॥
रेगुप्तो वर्जयेत् क्रौञ्चनिषादाद्यु(वु)भयत्र च ॥
रागोऽसावौडवस्तस्माद्देशान्तरमनोहरः ॥ ३ ॥
रागे **रामामनोहार्या**मारोहे धैवतं त्यजेत् ॥
उभयत्रापि ऋषभं त्यजेदौ(डव)षाडवे ॥ ४ ॥
सौराष्ट्रराग आरोहे निषादस्वरवर्जनम् ॥
धैवते श्रुतियुक्तत्वं ततः षाडवपूर्णकः ॥ ५ ॥
सम्पूर्णजातौ **मालव्यां** पिको वक्रोऽवरोहणे ॥
नादनामक्रियाद्यास्तु पञ्च **मालवगौलवत्** ॥ ६ ॥
रीतिगौले समारोहे ऋषभं (व)र्जयेत्ततः ॥
अवरोहे पञ्चमं तु (वर्ज)येदेष षाडवः ॥ ७ ॥

---

2 भ. को. P. 324 reads (a) राम for नाम । (d) पूर्णकः for पूर्णजः ।
आरोहे गो वर्ज्यः । षाडवसम्पूर्णः ।

3 ,, ,, 558 ,, (a) रेगुप्तौ for रेगुप्तो । (b) निषादौ for निषादादि । (c) औडुवः for औडवः ।
मनी वर्ज्यौ । औडवः ।

4 ,, ,, 550 ,, (a) मनोहारे for मनोहार्यां ।
रिः वर्ज्यः । आरोहे धैवतोऽपि । औडवषाडवः ।

5 ,, ,, 743 ,, धः ४ । आरोहे निः वर्ज्यः । षाडवसम्पूर्णः ।

6 ,, ,, 492 ,, पिकः पञ्चमः । सम्पूर्णा ।
१ नादनामक्रिया । २ रेगुप्तः । ३ रामामनोहारी ।
४ सौराष्ट्रः । । ५ मालवी । इति पञ्च मालवगौलजाः ।

7 ,, ,, 553 ,, आरोहे रिः वर्ज्यः । अवरोहे पः वर्ज्यः । षाडवः ।

आनन्दभैरवीरागे त्यजेदारोहणे पुनः ॥
ऋषभं धैवतं चापि तस्मादौडवपूर्णकः ॥ ८ ॥

जयन्त्यामपि पूर्णायां निषादो वक्र उच्यते ॥
त्रयोऽमी **रीतिगौलाद्या भैरवी**मिलिताः स्मृताः ॥ ९ ॥

अथ **नाट आरभ्यां(कुरञ्ज्यां)** स्यादारोहे मेषवर्जन(म्) ॥
पिक(वक्रमथान्यत्र) त्यजेदृषभपञ्चमौ ॥ १० ॥

द्विज(जा)वन्त्यत(न्त्यां) शुद्धमध्यस्त्ववरोहे (वि)वर्जितः ॥
मूर्च्छनाभेदमा(त्रेण रम)णी(यतरो) भवेत् ॥ ११ ॥

(**सुरटीरा**)**ग** आरोहे छागधैवतवर्ज(नम्) ॥
(ऋषभे)श्रुति-(युक्तत्वं) जातिरूढ्यात् (रौडवपूर्णका) ॥ १२ ॥

(**शुद्धसावे**) **र** (**रिरागे तु**) गान्धा(राश्वविवर्ज)रं (नम्) ॥
मोहने वर्जयेन्मध्यनिषाद(दावपि)के(व)लम् ॥ १३ ॥

ततो **यदुकुले** मेषगजावारोहणे त्यजेत् ॥
(**के**)**दारगौलः** (सङ्गत्या) भेदाद्यदुकुलोपमः ॥ १४ ॥

इमे **नाट आरभ्या(कुरञ्ज्या)**द्याः सप्त **काम्भोजि**सम्मिताः ॥

8	भ. को. P.	51	reads	(d) औडुव for औडव। आरोहे रिधौ वर्ज्यौ। औडवसम्पूर्णः।
9	,, ,,	224		१ रीतिगौलः। २ आनन्दभैरवी। ३ जयन्ती। इति त्रयो भैरवीमेलजाः।
10	,, ,,	316	reads	(a) कुरञ्ज्यां for आरभ्यां। आरोहे गो वर्ज्यः। अवरोहे रिपौ वर्ज्यौ। षाडवौडवः।
11	,, ,,	290	,,	(a) द्विजावत्यां for द्विजावन्त्य। अवरोहे मो वर्ज्यः। सम्पूर्णषाडवः।
12 ab	,, ,,	733		आरोहे गधौ वर्ज्यौ। औडवसम्पूर्णः।
13 ab	,, ,,	672		गधौ वर्ज्यौ।
cd	,, ,,	511		मनी वर्ज्यौ।
14 ab	,, ,,	513		आरोहे गनिलोपः।
cd	,, ,,	147		
15 ab				१ नाटकुरञ्जी। २ द्विजावती। ३ सुरटी। ४ शुद्धसावेरी। ५ मोहनः। ६ यदुकुलः। ७ केदारगौलः। सप्त काम्भोजीमेलजाः।

(कापि)रागे छागगजौ श्रुतियुक्तौ विशेषतः ॥ १५ ॥
ततस्तु मध्यमावत्यां गान्धार(राश्चवि)वर्जनम् ॥
उशानिरागे गान्धा(रो व)क्रवज(र्जो)विशिष्यते ॥ १६ ॥
अठाणायां धैवते तु श्रुतियुक्तत्वमिष्यते ॥
वसन्तरागे (व)क्रस्तु निषादस्वर इष्यते ॥ १७ ॥
पञ्च(श्चैते का)प(पि)रागाद्याः श्रीरागसदृशा इमे ॥
आभीर्यां(तु स)मारोहे वृ(ऋ)षभं वर्जयेत् पुनः ॥ १८ ॥
गान्धा(रधैवतौ)तत्र श्रुतियुक्तावपीरितौ ॥
पुन्नागाख्यवराल्यां (तु षड्ज)धैवत(योः)पुनः ॥ १९ ॥
स्थायिभेदा(दो) भवेदेता(ते) (बुधैर्ज्ञेये) हि तोडिवत् ॥
(सा)रम्भे(ङ्गे)ऽजश्रुतिस्तद्वदवरोहेऽजवर्जनम् ॥ २० ॥
(सम्पूर्णषाडवस्त)स्मात् कल्याणीरागवद्भवेत् ॥
(वेलावल्यामजो व)क्रः स्यादत्र त्ववरोहणे ॥ २१ ॥

---

cd भ. को. P. 128, 638 reads (a) विशेषदः for विशेषतः । गनी त्रिश्रुतिकौ ।
16 ab भ. को. P. 467, 638 reads (b) गान्धाराश्वविवर्जनम् for b. गान्धाराङ्क also for गान्धाराश्व । गधलोपः ।
cd „ „ 86, 638 „ (d) वर्जो for वज । आरोहे गो वक्रः । अवरोहे लोपः । सम्पूर्णषाडवः ।
17 ab „ „ 9, 638
cd „ „ 592, 638 reads (d) उच्यते for इष्यते ।
18 ab १ कापिः । २ मध्यमावती । ३ उशानिः । ४ अठाणा । ५ वसन्तः । पञ्च श्रीरागमेलजाः ।
18 cd भ. को. P. 65 reads (c) आहीर्यां for आभीर्यां । (d) रिषभं for वृषभं ।
19 ab „ „ „ „ (b) विती for वपी- ।
19 cd „ „ 374
20 ab „ „ „ reads (a) स्थायिभेदो for स्थायिभेदा ।
१ आभीरी । २ पुन्नागवराली । तोडीमेलजे ।
20 cd „ „ 720 „ (c) सारङ्गे for सारम्भे ।
21 ab „ „ „ सम्पूर्णषाडवः । कल्याणीमेलजः सारङ्गः ।
cd „ „ 643

सदृशी **वेगवाहि**(न्या गीयते वैणिकोत्त)मैः ॥
नीलाम्बर्यां त(तः पश्चादारो)हे (वृष)धैवतौ ॥ २२ ॥

वर्जयेदवरोहे तु वक्रौ (गान्धारधैवतौ) ॥
(**नवरोजौ**)श्रुतिं हित्वा गीयते वैणिकैः पुनः ॥ २३ ॥

(**व्यागडाया**)मथारोहे वर्जयेदृषभं पु(नः) ॥
(तथैव धैव)त(तं) वक्रं वदेत् षाडवपू(र्णके) ॥ २४ ॥

बिलहर्याः समारोहे मध्य (कु)ञ्जरवर्जनम् ॥
केदाररागे धैवं तु (वर्जयेदेव सर्वतः) ॥ २५ ॥

(**कुरञ्ज्याम**वरो)हे तु धैवतं वर्जयेत् पुनः ॥
सर्वत्र श्रुतिराहित्यं स्थायिभेदो(ऽपि सम्मतः) ॥ २६ ॥

(**कन्नडायां** वृषं त्यक्त्वा स्वारो)हे द्व(व)क्रपञ्चमम् ॥
तथा मध्यमवक्रं स्यादवरोहे **मने**(**नो**)**ह**(**रे**) ॥
अथारभ्यां समा(रोहे) नि निषादः (मेषकुञ्जरवर्जनम्) ॥ २७ ॥

(**तदुदयचन्द्रिका**)या(मव)रोहे वृषभवर्जमश्रुति(मश्वादि)कं (स्यात्) ।
(स्यात्) **पूर्णचन्द्रिकायां**(त्ववरोहे मेषकुञ्जरत्यागः) ॥ २८ ॥

---

22 ab	भ. को.	P.	643		वेगवाहिनीमेलजा वेलावली ।
cd	,,	,,	339		—
23 ab	,,	,,	,,		
cd	,,	,,	312		—
24	,,	,,	425		आरोहे रिर्वर्ज्यः । धो वक्रः । षाडवसम्पूर्णः ।
25 ab	,,	,,	421	reads	(a) बिलहर्यां for बिलहर्याः । आरोहे मनी वर्ज्यौ ।
cd	,,	,,	147		धलोपः ।
26	,,	,,	143	,,	(d) भेदे for भेदो ।
27 ab	,,	,,	105	,,	रिर्वर्ज्यः ।
cd	,,	,,	472	,,	(d) मनोहरे for मनेह ।
ef	,,	,,	56	,,	(f) मेषकुञ्जरवर्जनम् for f । गन्योर्लोपः ।
28 ab	,,	,,	73	,,	(b) मश्वादिकं for मश्रुति ।
cd	,,	,,	376		अवरोहे गनी वर्ज्यौ ।

नीलाम्बो(**म्ब**)र्यादिदशकं **शङ्कराभर**(**णे**)प(मतम्) ॥
एवमेव(च) रागेषु पर्यालोच्य(च्यं) (मनीषिभिः) ॥ २९ ॥

(जानाति यो बहुवि)गा(धा)गममन्त्रतन्त्र-
शिल्पादिकं द्रविडतन्त्ररहोऽपि वेत्ति ॥
जानाति यः सकलवेदरहस्यगम्या-
मुन्निद्रितोल्लसितकु(ण्डलिनीं सु)षुम्नाम् ॥ ३० ॥

तेनैव **सङ्कृति**कुलोदधिकल्पकेन
त्रि(स्कन्ध)शास्त्रसुधिया **परमेश्वरेण** ॥
वीणा(वि)वेकजननाय कृतं जडाना-
मन्हाय **लक्षण**मिदं विदुषां मुदेऽस्तु ॥ ३१ ॥

॥ इति श्रीकविशार्दूले(न परमेश्वरेण विरचि)ते वीणालक्षणे षष्ठोल्लासः ॥

---

29 १ नीलाम्बरी । २ नवरोजिः । ३ न्यागडा । ४ बिलहरी । ५ केदारः । ६ कुरञ्जी । ७ कन्नडा । ८ आरभी । ९ उदयचन्द्रिका । १० पूर्णचन्द्रिका । एते दश शङ्कराभरणमेलजाः ।

31 सङ्कृतिः— भारद्वाजगणस्थं गोत्रम् । द्विगोत्रेष्वपि सङ्कृतेः पाठो दृश्यते ।

॥ श्री ॥

॥ श्लोकार्धानुक्रमणी ॥

INDEX OF HALF VERSES

॥ श्रीः ॥

॥ वीणाप्रपाठकः ॥

INTRODUCTION

Detailed account of the ms.

1 The text of Vīṇāprapāṭhaka is based upon a single ms. described below :—

1 Place of deposit :—Baroda.
2 Name of the Library :—Oriental Institute.
3 Accession No :—5351.
4 Date :—Undated.
5 No. of folios :—15.
6 No. of lines in each folio :—8. Fo. 9 contains five lines while Fo. 11 b contains three lines only.
7 No. of letters in each line :—16.
8 Material and Script :—Paper. Devanāgarī.
9 Style of handwriting :—Written in the uniform handwriting.
10 Orthographical peculiarities :—Anusvāra is written throughout wherever Parasavarṇa is required according to grammatical rules. Full of scribal errors. Written very carelessly.
11 Nature and condition of the ms. :—Incomplete. Written in black ink on both the sides. Condition : good. Consisted of 17 folios as stated at the top of the first folio—वीणापपाठकग्रंथ संपूण पत्र १७. The last two folios are missing.
12 Beginning and end :—The ms. begins with श्रीगणेसाय नमा । श्री । etc. and ends with पादेन गुंजामात्र स्यात्पि ।
13 Other details :—The ms. does not bear any title. There is no colophon at the end as the ms. is incomplete. The line written at the top of the first folio in a different hand and ink indicates the title. It runs as follows :—
वीणाप्रपाठक ग्रंथ संपूण पत्र. १७.

The mss. of Vīṇāprapāṭhaka are not found recorded in the Catalogus Catalogorum of Aufrecht. Other sources of the mss. of this work are also unknown.

Constitution of the text

2 Obvious scribal errors have been silently corrected while constituting the text and suggestions have been given in the brackets wherever necessary.

The Author

3 Nothing is known about the author of this small work. The text is not his original composition and therefore cannot throw any light on his scholarship.

The text

4 The text is divided into two parts or chapters. The first part deals with Vīṇā or lute while the second part deals with the instruments in general. The compiler has referred to Bharata and Yājñavalkya in the first chapter. His reference to Bharata is obviously wrong as the quotations are not found in the Nāṭyaśāstra of Bharata. All the verses attributed to Bharata are found in Saṅgītaratnākara. He could have corrected himself had he carefully seen the tenth verse which contains the name of the author of Saṅgītaratnākara.— एषा श्रीशार्ङ्गिणोदिता। His reference to Yājñavalkya is correct.

Sources

5 All the verses excepting 12ab, 17ab and 32 in the first chapter and 49 and 56 in second chapter have been traced and their sources with their variants have been given in the foot-notes for a critical study of the text.

6 The following chart will give a fair idea of the relative position of the verses of the first chapter in their respective sources.

Saṅgītaratnākara Chapter VI	Vīṇāprapāṭhaka Chapter I.
V. 50cd—53	V. 7cd—10.
,, 54 —60ab	,, 1 —7ab
,, 60cd—61ab	,, 14.
,, 63cd—64ab	,, 16.
,, 73 —86	,, 19—31.
Yājñavalkyasmṛti.	
III. 4.115	,, 11
Svaramelakalānidhi.	
III. 10	,, 11
III. 6cd- 7	,, 12cd-13.

Repeated verses :—15 = 31, 17cd = 9cd, 18 = 25cd, 26ab.

Verses not traced :—12ab, 17ab, 32.

The result of Tracing

7 It will be clear from the above statement that the first ten verses have been borrowed from Saṅgītaratnākara; but their order has been changed. The first verse of our text which contains the word अस्या: for वीणा presupposes the existence of some verses preceding it describing Vīṇā. If the text is begun with 7cd, then also it requires the help of preceding verses. Thus the text of first ten verses if arranged according to Saṅgītaratnākara remains incomplete. The exact place of V. 14 is after 7ab. It has nothing to do with Śatatantubāṇavīṇā. V. No. 11 is borrowed from Yājñavalkyasmṛti. It is available in Svaramelakalānidhi also. V. 12ab is not traced. It has no connection with 12cd. It is in-

complete in itself. V. 12cd and 13 are found in Svaramelakalānidhi. V. 14 is referred to above. V. 31 is wrongly repeated as V. 15 under Kapiśīrṣṭī Vīṇā. It does not contain the definition or the description of Kapiśīrṣṭī Vīṇā. V. 16 does not contain anything about Vakrā Vīṇā. V. 17ab is not traced. It has no connection with 17cd which is wrongly read here. The name Picchorā occurs in 17ab, but the line is not sufficient to give an idea of Picchorā Vīṇā. The exact place of V. 18 is 25cd and 26ab. The meaning of V. 18ab and cd becomes clear with the help of the preceding and the following lines *i.e.* 25ab and 26cd. Hence V. 18 is wrongly read here and does not contain the description of Piśīlā as indicated by the author. V. 19-31 are in their proper order. The only absurdity is that these verses do not contain the definitions or descriptions of Kāṇḍa Vīṇā, Alābu Vīṇā, and Mahā Vīṇā. V. 32 is not traced.

8 The above analysis of the first chapter shows that these verses are not directly borrowed from Saṅgītaratnākara—the original source of the verses; as their order is changed. The source from which they are borrowed in the order of the text is unknown. The following names of Vīṇās not followed by any definition or description are read in the text. 1 Śatatantu Vīṇā, 2 Kapiśīrṣṭī, 3 Vakrā, 4 Picchorā, 5 Piśīlā, 6 Kāṇḍa Vīṇā, 7 Alābu Vīṇā, 8 Mahāvīṇā. These names are not available in Saṅgītaratnākara and other important works on Saṅgīta. However they are all seen in Śrauta Sūtras. The references are all interesting and important and therefore are given below :

शाङ्खायनश्रौतसूत्रम् ।

सप्तदश यानानि युक्तानि रथान् हस्तिनो निष्कान् **दुन्दुभीन्** । १५. ३. १४

अथाध्वर्युर्वीणागणगिनः संप्रेष्यति पुराणैरेनं पुण्यकृद्भी राजभिः संगायतेति । १६. १. २५

अथैतां वीणां **शततन्त्री**मुपकल्पयन्ति । तस्याः पालाशी सूना भवति । औदुम्बरो दण्डः । अपि वौदुम्बरी सूना पालाशो दण्डः । तामानडुहेन सर्वरोहितेन चर्मणा बाह्यतो लोम्नामभिषीव्यन्ति । तस्यै मूले दण्डं दशधातिविध्यन्ति तद् दश दश रज्जूः प्रवयन्ति । ता अग्रे नाना बध्नन्ति । दण्डसमासा वीणा **शततन्त्री** भवति । वेतसशाखा सपलाशा वादिन्युपक्लृप्ता भवति । स्वयं तता वा शरेतिका। घाटकर्कैरीरवघटरिकाः **काण्डवीणाः पिच्छोरा** इति पत्न्य उपकल्पयन्ति । उपमुखेन **पिच्छोरां** वादयेत् । वादनेन **काण्डवीणाम्** । तां **घाटरी**रित्याचक्षते । या **घाटरी मृदु** वादयेत् साराति: स्यात् । द्विषन्तं जनयेत् । १७. ३. १-१७.

चतुरो दुन्दुभीनध्वर्युः सहननामुपकल्पयति । १७. ४. १.

उद्गातैव प्रथमो वीणां प्रवादयति । तं पत्न्योऽनु प्रवादयन्ति । आघ्नन्ति दुन्दुभीन् । आहन्ति भूमिदुन्दुभिम् । कुर्वन्ति घोषं घोषकृतः । १७. १४. ८-१२.

उत्तमायां स्तोत्रियायां परिशिष्टायामवतृणत्ति दुन्दुभीन् । अवतृणत्ति भूमिदुन्दुभिम् । उपरमन्ति घोषं घोषकृतः । १७. १७. ५-७.

लाट्यायनीयश्रौतसूत्रम् ।

अलाबुवीणां वक्राकपिशीर्ष्ट्यौ च पूर्वस्यां द्वारि बहिः सदसम् । **वक्राकपिशीर्ष्ट्यौ** दुन्दुभींश्च प्रतिमन्त्रयेत या **वक्रायां कपिशीर्ष्ट्यां** दुन्दुभौ यश्च वाद्ये घोषो यो महतो महांस्तेन नो राद्धि मा वदेति । **महावीणापिशीलवीणे** चापरस्यामन्तरिति गौतमशाण्डिल्यौ बहिरिति धानञ्जय्यः । **अलाबुवीणापिशीलवीणे** च प्रतिमन्त्र-

येनालाबुवीगे **पिशीली** च यं मन्त्रमधिजग्मतुस्तेनेदमुपगायतां ते साममहयेष्यत इति । पश्चिमेनोपगातॄन् द्वे द्वे एकैका पत्नी **काण्डवीणां पिच्छोरां** च व्यत्यासं वादयेत् । उपमुखं **पिच्छोरां** वादनेन **काण्डमयीम्** । ता **अपघाटिला** इत्याचक्षते । ताः प्रतिमन्त्रयेत यां पत्न्य**पघाटिलां** मृदुकं वादयिष्यति सारातिमपबाधतां द्विषन्तं तेजनित्वगिति ।

कात्यायनश्रौतसूत्रम् ।

पृष्ठ्योपाकरणं **बाणेन शततन्तुना** । मौञ्जास्तन्तवो वैतसं वादनम् । १३. २. १८-१९.

सदः स्रक्तिषु दुन्दुभीन् वादयन्ति । आग्नीध्रमारेण श्वभ्रं सवालधानेन चर्मणावनह्य वालधानेनाहन्ति । **गोधा-वीणाकाण्डवीणाश्च** पत्न्यो वादयन्ति । उपगायन्ति । अन्यांश्च शब्दान् कुर्वन्ति । १३. ३. १५-१९.

बाणो महती वीणा । शतं तन्तवो यस्यासौ **शततन्तुः** । तेनोपाकरणम् । अस्मिन् बाणे मौञ्जास्तन्तवो वैतसवृक्ष-सम्बन्धि वादनमित्यर्थः । गोधाचर्मणा नद्धा वीणा **गोधावीणाः** । काण्डः शर इत्युच्यते तन्मय्यो वीणाः । ता उभयविधा वीणाः सर्वाः पत्न्यो वादयन्ति स्तुतिभिः सत्रिणस्ता उपगायन्तीत्यर्थः । मर्दलभेरीपटहादिजन्यानन्यानपि शब्दान् लोकाः कुर्वन्तीति भावः ।

आपस्तम्बश्रौतसूत्रम् ।

औदुम्बरस्य वीणादण्डस्य दशानिमथितानि । २१. १७. ८ विकल्पन्ते पत्नयो**ऽपाघाटलिकास्तम्बलवीणाः पिच्छोला** इति । २१. १७. १६. निकल्पन्ते वीणावादाः शङ्खान् नालीस्तूणवानिति । २१. १७. १७. दिक्षु दुन्दुभीन् प्रबध्नन्ति । २१. १८. १ **अपाघाटलिकास्तम्बलवीणाः पिच्छोला** इति पत्नयो वादयन्ति । २१. १९. ३. सम्प्रवदन्ति वीणावादाः शङ्खान् नालीस्तूणवानिति । २१. १९. ४.

वाराहश्रौतसूत्रम् ।

बाणं शततन्तुं मौञ्जिभिर्ग्रन्थिभिरध्वर्युरुद्गात्रे प्रयच्छति । ३. २. ५. २५. अध्वर्युरन्यश्चैक...... **काण्डवीणाश्च** । ३. २. ५. २६. वेदिस्रक्तिषु दुन्दुभीनाघ्नन्ति । ३. २. ५. २७.

In short the first chapter does not satisfactorily deal with Vīṇā and is incomplete in many respects.

9 The second chapter deals with instruments in general. It is a copy of the Vādyādhyāya—fifth chapter of Saṅgīta Darpaṇa of Catura Dāmodara. All the verses with slight variations agree with those of Saṅgīta-Darpaṇa. Verses No. 49 and 56 ab are not available in Saṅgīta-Darpaṇa. Four verses after 14 ab. and 1½ v. after 18 ab are missing in our text. They are given in the foot-notes. After 44 ab, v. 63 cd, 64 ab, 34 and 35 ab are wrongly repeated. After 56 ab two lines are unnecessarily repeated. The text of Vīṇāprapāṭhaka ends with V. No. 63 ab as the last two folios are missing. As the whole text agrees with Saṅgīta-Darpaṇa the remaining verses have been directly borrowed from it to complete the text and given in brackets.

10 As the present chapter is a copy of Saṅgīta-Darpaṇa it is necessary to evaluate how far the author of Saṅgīta-Darpaṇa has contributed to the Saṅgīta literature. The edition of Saṅgīta-Darpaṇa utilised here and described in the foot-notes is not correctly printed and not critical also. The verses of this chapter have been traced to Saṅgīta-Ratnākara and the variants according to Saṅgīta-Ratnākara are given in the foot-notes. The result of tracing the verses can be briefly stated or follows :—

Verses borrowed :—4 cd, 6, 7 ab, 8 ab, 9, 11, 14 cd, 15 cd, 16, 18, 19 ab, 24, 26, 27, 28 ab, 30, 31 ab, 32, 33, 35, 36, 37 abcd, 38, 39, 40,

41 ab, 46, 47 ab, 50 acd, 52, 54, 55, 62, 63, 65, 66 cd, 67, 68 abcd, 69, 70, 71 ab (34).

Verses adopted :—1, 2, 3, 4 ab, 5, 8 cd, 10, 14 ab, 15 ab, 19 cd, 20 ab, 23 ab, 25, 29 ab, 42 cd, 44 ab, 64 ab, 72, 73, 74, 75 (15).

Verses not traced :—7 cd, 12, 13, 14 ef, 17, 20 cd, 21, 22 cd, 23 cd, 28 cdef, 29 cd, 30 cd, 34, 37 ef, 41 cd, 42 ab, 43, 44 cd, 45, 47 cd, 48, 49, 50 b, 51, 53, 56, 57, 58, 59, 60, 61, 64 cd, 66 ab, 68 cf, 71 cd (26).

11 It will be seen from the above analysis that out of 75 verses of this chapter about 34 verses have been actually borrowed from Saṅgītaratnākara. Nearly 15 verses have been adopted from it ; while the remaining 26 verses are not traced. Out of these 26 verses 10 verses are stereotypes, 9 verses contain ideas present in Saṅgītaratnākara, while the remaining seven must have been borrowed from some other source.

12 Thus it can be very well said that the present chapter is a short summary of the Vādyādhyāya of Saṅgītaratnākara ; and Catura Dāmodara cannot claim any new contribution to Saṅgīta literature so far as this chapter is concerned. The text is useful only for those who have no time and energy to read and study Saṅgītaratnākara. They can get an idea of the selected instruments like Vīṇā, Mṛdaṅga etc. from this chapter.

13 The variants have not been discussed in the foot-notes because Saṅgītaratnākara is the original source of all these verses and the authors while borrowing might have changed words here and there to show their originality.

Date of compilation

14 There is no evidence to fix up the exact date of compilation of Vīṇāprapāṭhaka. It can only be stated that it is later than Saṅgīta-darpaṇa of Chatura Dāmodara C. 16th century A.D.

15 In short the author has described Vīṇā and its fingering in the first chapter and musical instruments such as Ālāpinī, Kinnarī and Pinākī Vīṇās, Vaṁśa, Muralī, Madhukarī, Kāhalā, Śṛṅga, Śaṅkha, Paṭaha, Mardala and Tāla, in the second chapter. When compared with Saṅgīta-Ratnākara, these two chapters appear to be incomplete in many respects.

16 Lastly I have to thank Dr. B. J. Sandesara, the Director of the Oriental Institute and Dr. U. P. Shah, the Deputy Director of the institute, for their hearty co-operation, help and encouragement to critical research. I am also thankful to the Manager of the University Press for his co-operation in printing the work very carefully.

Oriental Institute, J. S. PADE
20-8-'58.

॥ श्रीः ॥

वीणाप्रपाठकः ।

सामान्यतो वीणालक्षणम् ।

दर्शनस्पर्शने चास्या भोगस्वर्गापवर्गदे ॥
पुनीतो विप्रहत्यादिपातकैः पुनीतं(पतितं)जनम् ॥ १ ॥

तदाह भरतः ।

दण्डः शम्भुरुमा तन्त्रीः ककुभः कमलापतिः ॥
इन्दिरा पत्रिका ज्ञेया (ब्रह्मा) ब्रह्मा कण्ठं(तुम्बं) नाभिः सरस्वती ॥ २ ॥

दोरको वासुकी जी(किर्जी)वा सुधांशुर्दोरिका रविः ॥
सर्वदेवमयी तस्माद्वीणेयं सर्वमङ्गला ॥ ३ ॥

अधस्तुम्बमधोवक्त्रमूर्ध्वं तन्त्रीर्यथा भवेत् ॥
तथास्या दोरिकादेशं वामस्कन्धे निधाय च ॥ ४ ॥

ककुभं दक्षिणस्याङ्घ्रेः पार्श्व(र्श्वे)सन्धार्य यत्नतः ॥
न्यस्तां पृष्ठे कनिष्ठाया वामहस्तस्य कमृ(म्रि)काम् ॥ ५ ॥

या. स्मृ. याज्ञवल्क्यस्मृतिः—Nirṇayasāgara, Bombay, 1936.

सं. द. संगीतदर्पणम्— चतुरदामोदरविरचितम् । Edited by K. Vāsudeva Śāstri B.A. Tanjore, 1932.

सं. र. संगीतरत्नाकरः— निःशङ्कशार्ङ्गदेवप्रणीतः । Ānandāśrama Poona, 1897.

स्व. क. स्वरमेलकलानिधिः— रामामात्यप्रणीतः । Edited by M. S. Ramaswami Aiyar—the Annamalai University, 1932.

1 सं. र. 6.54 reads पतितं for पुनीतं ।
2 ,, 6.55 ,, तन्त्री for तन्त्रीः । ब्रह्मा for ज्ञेया । तुम्बं for ब्रह्माकण्ठं ।
3 ,, 6.56 ,, वासुकिः for वासुकी ।
4 ,, 6.57 ,, तथा स्यात् also for तथास्या ।
5 ,, 6.58 ,, पाष्ण्यां संधाय for पार्श्व(र्श्वे)सन्धार्य ।
कम्रिकाम् for कमृकाम् ।

सारणासारणेत्युक्तामनामाङ्गुलिवेष्टिती(ताम्) ॥
आकुञ्चन् मध्यमापार्श्वलग्नां तर्जनिकाग्रतः ॥ ६ ॥

निपीड्योरःस्थलासन्नां तन्त्रीमध्ये(धि)निधाय च ॥
सन्दिग्धपत्रिका तन्त्री श्लेषं क्षेप्या कला च सा(वता) ॥ ७ ॥

या पक्ववेणुवल्कोत्था दोरिका त्रिवृता शुभा ॥
कनिष्ठा नखविस्तारा द्वादशाङ्गुलदीर्घिका ॥ ८ ॥

सुवृत्ता मसृणा तुम्बादधस्तादङ्गुलत्रये ॥
दण्डे संवेष्टयेन् मन्द्रस्वरस्थानोपलक्ष(क्षि)काम् ॥ ९ ॥

यत्राभिदधिरे वीणा तां (धीरास्तां) वीणां सर्वसम्मताम् ॥
प्रकृतिः सर्ववीणानामेषा श्रीशार्ङ्गिणोदिता ॥ १० ॥

याज्ञवल्क्यः ।

वीणावादनतत्त्वज्ञः श्रुतिजातिविशारदः ॥
तालज्ञश्चाप्रयासेन मोक्षमार्गं स ग(निय)च्छति ॥ ११ ॥

अनेन सर्ववीणानां स्वर्गमोक्षस्य साधनम् ॥
स्वर्गा(धर्मा)र्थकाममोक्षाणामिदमेव हि साधनम् ॥ १२ ॥

6 6.59 ,, वेष्टिताम् for वेष्टिती ।
7 ,, 6.60ab ,, तन्त्रीमधि for तन्त्रीमध्ये ।
6.50cd ,, कलावता for कला च स ।
These two lines have no connection with each other. सं. र. reads V. 14 of our text after 7ab.
ऊर्ध्वाधः सारयेद्वादसिध्यै हस्तं तु दक्षिणम् ॥ ६० ॥
त्यक्त्वा वितस्तिं जीवातस्तन्त्र्यां(न्त्रीं) विन्यस्य सारयेत् ॥
8 ,, 6.51 reads दैर्घ्यभाक् for दीर्घिका ।
9 ,, 6.52 ,, लक्षिकाम् for लक्षकाम् ।
10 ,, 6.53 ,, धीरास्तां for वीणा तां । एकतन्त्रिकाम् for सर्वसम्मताम् ।
11 या. स्मृ. III. 115 reads नियच्छति for स गच्छति ।
स्व. क. 3. 10 —
12ab — Not traced. Not connected with cd.
cd स्व. क. 3.6cd reads धर्मार्थ for स्वर्गार्थ । इयमेव for इदमेव ।

गायतो ब्राह्मणौ वीणागाथिनाविति च श्रुतौ ॥
अश्वमेधप्रकरणे वीणोक्ता धर्मसाधनम् ॥ १३ ॥

इति सामान्यलक्षणम् ॥

अथ वादनप्रकारमाह ।

प्रथमं शततन्तुबाणवीणोच्यते ।

ऊर्ध्वाधः साधयेन्नादसिध्यै हस्तं तु दक्षिणम् ॥
त्यक्त्वा वितस्तिं जीवातस्तन्त्रीं(न्त्र्यां)विन्यस्य सारयेत् ॥ १४ ॥

प्रथमसारणा ।

अथ कपिशीर्ष्यीलक्षणम् ।

चतुरङ्गुलिसंघाते कुञ्चिताङ्गुष्ठके तले ॥
कनिष्ठातर्जनीपार्श्वस्पर्शस्तन्त्र्याः प्रसारकः ॥ १५ ॥

इति कपिशीर्ष्यीलक्षणम् ।

अथ वक्रावादनम् ।

दक्षो(तदोत्)क्षिप्ता सन्निविष्टा स्पृष्टे द्वेवसरे(स्पृष्ट्वैव सरणे) भवेत् ॥
क्रमादेतद्द्वयाभ्यासा(भ्यां स्या)दुभयी सारणा मता ॥ १६ ॥

इति वक्रालक्षणम् ।

---

13 ख. क. 3.7 reads श्रुतिः for श्रुतौ ।
अप वाऽएतस्मात् । श्री राष्ट्रं क्रामति योऽश्वमेधेन यजते यदा वै पुरुषः श्रियं गच्छति वीणाऽस्मै वाद्यते ब्राह्मणौ वीणागाथिनौ संवत्सरं गायतः श्रियै वा एतद्रूपं यद्वीणा श्रियमेवास्मिंस्तद्धत्तः । शतपथब्राह्मणम् । 13.1.5.1.
अप वा एतस्माच्छ्री राष्ट्रं क्रामति । योऽश्वमेधेन यजते । ब्राह्मणौ वीणागाथिनौ गायतः । श्रिया वा एतद्रूपम् । यद्वीणा । श्रियमेवास्मिन् तद् धत्तः । तैत्तिरीय-ब्राह्मणम् । III. 9.14.

14 सं. र. 6.60 cd 61ab. reads तन्त्र्या for तन्त्रीं ।
Acc. to सं. र. this verse should be read after 7ab.

15 सं. र. 6.86. Repeated again as verse No. 31 where it is genuine.

16 सं. र. 6.63cd 64ab reads तदोत्क्षिप्ता for दक्षोत्क्षिप्ता । स्पृष्ट्वैव सरणे for स्पृष्टे द्वेऽवसरे । द्वयाभ्यां स्यात् for द्वयाभ्यासात् ।

पिच्छोरालक्षणम् ।

हस्तद्वयस्य संयोगे पिच्छोरामुखमारुतात् ॥
दण्डे संवेष्टयेन् मन्द्रस्वरस्थानोपलक्षिकाम् ॥ १७ ॥

इति पिच्छोरा ।

अथ पिशिला ।

बहिस्तन्त्रीहतिस्तूर्णं कर्तरी कीर्तिता बुधैः ॥
दक्षिणः कर्तरीं कुर्याद्वामहस्तस्तु तन्त्रिकाम् ॥ १८ ॥

इति पिशिला ।

अथ काण्डवीणा ।

(भ्रमरः) काण्डवीणायां चतुरङ्गुलिताडगम् ॥
मध्यमानामिकाभ्यां च बहिर्घातोऽत्र सन्धितः ॥ १९ ॥
तर्जनीपार्श्वलग्नायास्तथा(न्त्या)बहिरनामया ॥
हननं च्छिन्नमाचष्टे श्रीमत्सोढलनन्दनः ॥ २० ॥

इति काण्डवीणा ।

अथालाबुवीणा ।

क्रमाद् द्रुतं नखैर्घातश्चतुर्भिर्नखकर्तरी ॥
स्फुरिते कम्पि(म्प)ते तन्त्रीः पृष्ठलग्नेव सारणा ॥ २१ ॥
मुहुः सारणया तन्त्रीघर्षणं वसितो मतः ॥
तन्त्रीलग्नाङ्गुष्ठपार्श्वा कर्तरीवत्तु हन्यते ॥
कनिष्ठासारणाभ्यां वा यत्रासौ घोष उच्यते ॥ २२ ॥

17ab. Not traced. Not connected with the next line.
cd. सं. र. 6.52cd. Read as 9cd. wrongly repeated here.

18 सं. र. 6.79cd, 80ab. Repeated again as verse no. 25cd, 26ab. where it appears to be genuine. The sense of V. 18 becomes complete only when 25ab is read before 18ab and 26cd after 18cd.

19 सं. र. 6.73 reads भ्रमरोऽन्तः क्रमाच्छीघ्रं for a.

20 ,, 6.74 ,, तन्त्र्या for तथा ।

21 ,, 6.75 ,, कम्पिता–कम्पते for कम्पिते । सारणाः for सारणा ।

22 ,, 6.76-77ab reads वासितो for वसितो । तु for च ।

दक्षिणानामया यत्र तन्त्रीरन्तर्निहन्यते ॥
वामस्य मध्यमाङ्गुल्या बहिस्तं रेफमूचिरे ॥ २३ ॥

अनामया बहिस्तन्त्रीघाताज्जातो यदा ध्वनिः ॥
तर्जन्या घार्यते बिन्दुर्निःशङ्कनोदितस्तथा(दा) ॥ २४ ॥

इति अलाबु(वीणा) ।

अथ महावीणा ।

अङ्गुलीभिश्चतसृभिः क्रमेण करयोर्द्वयोः ॥
बहिस्तन्त्रीहतिस्तूर्णं कर्तरी कीर्तिता बुधैः ॥ २५ ॥

दक्षिणः कर्तरीं कुर्याद्वामहस्तस्तु तन्त्रिकाम् ॥
यत्र सारणया हन्ति प्राहुस्तामर्धकर्तरीम् ॥ २६ ॥

उत्सृज्य सारणां हन्ति यत्र तन्त्रीं प्रदेशिनी ॥
निस्फोटिताभिधं पाणिममुं वाद्यविदो विदुः ॥ २७ ॥

उत्क्षिप्तया सारणया वामस्तन्त्रीं द्रुतं यदा ॥
निहन्ति कर्तरीतुल्यो दक्षिणः स्खलितस्तदा ॥ २८ ॥

तन्त्रीकर्षोङ्गुष्ठतर्जन्यग्राभ्यां शुकवक्त्रि(क्त्र)कः ॥
उद्वेष्टपरिवर्ताभ्यां तन्त्र्यां भ्राम्यति दक्षिणे ॥
स्वरस्थाने द्रुतं कम्रासारणं मूर्च्छना मता ॥ २९ ॥

तलेन दक्षिणो हस्तस्तन्त्रीं हन्ति ततः(हन्तीतरः)पुनः ॥
प्रदेशिन्या स्पृशेद्यत्र तलहस्तो भवेदसौ ॥ ३० ॥

---

23 ,, 6.77cdef —
24 ,, 6.78 reads तदा for तथा
25 ,, 6.79 —
26 ,, 6.80 —
27 ,, 6.81 ,, उत्सृष्टसारणा यत्र हन्ति for उत्सृज्य सारणां हन्ति यत्र । निष्कोटिता for निस्फोटिता ।
28 ,, 6.82 ,, —
29 सं. र. 6.83-84 reads वक्त्रकः for वक्त्रिकः ।
30 ,, 6.85 ,, हन्तीतरः for हन्ति ततः ।

स्पर्शोऽङ्गुष्ठकनिष्ठाभ्यामर्धचन्द्रोऽभिधीयते ॥
चतुरङ्गुलिसंघाते कुञ्चिताङ्गुष्ठके तले ॥
कनिष्ठातर्जनीपार्श्वस्पर्शस्तन्त्र्याः प्रसारकः ॥ ३१ ॥

इति महावीणा ।

अथ दुन्दुभिः ।

हस्तद्वयस्य संयोगे वियोगे चापि वर्तते ॥
दुधुन्धुमाक्षरैरेव दुन्दुभिः स निगद्यते ॥ ३२ ॥

॥ इति समाप्तम् ॥

---

31 ,, 6.86 —
32 Not traced.

॥ श्रीः ॥

॥ अथ वाद्याध्यायः ॥

गीतं निरूपितं तच्च वाद्याधीनमतो मया ॥
वाद्यं निरूप्यते गीत(नृत्ययो)रनुरञ्जकम् ॥ १ ॥

चतुर्विधं तत्कथितं ततं सुषिरमेव च ॥
अवनद्धं घनं चेति ततं तन्त्रीगतं भवेत् ॥ २ ॥

वीणादि सुषिरं वंशकाहलादि प्रकीर्तितम् ॥
चर्मावनद्धवदनं वाद्यते पटहादिकम् ॥ ३ ॥

अवनद्धं च तत्प्रोक्तं कांस्यतालादिकं घनम् ॥
घना मूर्तिः साभिघाता वाद्यते यत्र तद् घनम् ॥ ४ ॥

वीणा तु द्विविधा प्रोक्ता श्रुतिस्वरविशेषणात् ॥
श्रुतिवीणा पुरा प्रोक्ता स्वरवीणोच्यतेऽधुना ॥ ५ ॥

---

1 सं. द. V. 532 reads नृत्ययोरनुरञ्जनम् for नृत्ययोरनुरञ्जकम् ।

2 „ V. 533 —

cf. सं. र. 6.3 cd – 5

ततंतं सुषिरं चावनद्धं घनमिति स्मृतम् ॥ ३ ॥
चतुर्धा तत्र पूर्वाभ्यां श्रुत्यादिद्वारतो भवेत् ॥
गीतं ततोऽवनद्धेन रज्यते मीयते घनात् ॥ ४ ॥
वाद्यतन्त्री ततं वाद्यं सुषिरं सुषिरं मतम् ॥ ५ ॥

3 सं. द. V. 534 reads वंशं for वंश ।

cf. सं र. 6.6 ab.

चर्मावनद्धवदनमवनद्धं तु वाद्यते ॥

4 सं. द. V. 535 reads तु for च ।

cd सं. र. 6.6 cd „ घनो for घना । साभिघातात् for साभिघाता ।

5 सं. द. V. 536 :—

cf. सं. र. 6. 7-8

ततं वीणा द्विधा सा च श्रुतिस्वरविवेचनात् ॥
तत्र श्रीशार्ङ्गदेवेन श्रुतिवीणोदिता पुरा ॥ ७ ॥

एकतन्त्री तु तत्राद्या नकुलश्च त्रितन्त्रिका ॥
चित्रा वीणा विपञ्ची च ततश्चोन्मत्तकोकिला ॥ ६ ॥

आलापिनी किन्नरी च पिनाकीसंज्ञका(ज्ञिता)ऽपरा ॥
तन्त्रीभिः सप्तभिः क्वापि दृश्यते परिवादिनी ॥ ७ ॥

वंशः पावः पाविका च मुरली मधुकर्यपि ॥
काहला शृङ्गशङ्खाद्या भेदाः सुषिरवाद्यगाः ॥ ८ ॥

पटहो मर्दलश्चाथ हुडुक्का करटा घटः ॥
रुञ्जा डमरुको ढक्का डक्कुली ढक्करी तथा ॥ ९ ॥

त्रिवली दुन्दुभिर्भेरी निःसाणस्तुम्बकी तथा ॥
इत्यादयोऽवनद्धस्य भेदा वाद्यस्य कीर्तिताः ॥ १० ॥

वक्ष्यते स्वरवीणात्र तस्यामपि विचक्षणाः ॥
अङ्कित्वा स्वरदेशानां भागानुद्भिन्दते श्रुतीः ॥ ८ ॥

6 स. द. V. 537 reads त्रितन्त्रिकः for त्रितन्त्रिका । स्यान् मत्तकोकिला for चोन्मत्तकोकिला ।

सं. र. 6.9 reads तद्भेदास्त्वेकतन्त्री स्यात् for a । स्यान् मत्तकोकिला for चोन्मत्तकोकिला ।

7 सं. द. V. 538 reads संज्ञिका for संज्ञका
ab सं. र. 6.10 ab reads संज्ञिता for संज्ञका ।

8 सं. द. V. 539.
ab सं. र. 6.11 ab.
cd cf. सं. र. 6.11 cd 12 ab.

काहला तुण्डकिन्यौ च चुक्का शृङ्गमतः परम् ॥
शङ्खादयश्च वाद्यस्य सुषिरस्य भिदा मताः ॥

9 सं. द. V. 540 reads घटाः for घटः ।
ab सं. र. 6.12 cd —
cd ,, 6.13 cd reads डक्का for ढक्का । मण्डिडक्का च डक्कुली for cd.

10 सं. द. V. 541.
cf. सं. र. 6.14.

सेल्लुका झल्लरी भाणस्त्रिवली दुन्दुभिस्तथा ॥
भेरीनिःसाणतुम्बक्यो भेदाः स्युरवनद्धगाः ॥ १४ ॥

तालो(ऽथ) कांस्यतालः स्याद् घण्टा च क्षुद्रघण्टिका ॥
जयघण्टा ततः कम्रा शुक्तिपट्टादयस्तथा ॥
घनवाद्यप्रभेदाः स्युरेतेऽन्येऽपि च दर्शनात् ॥ ११ ॥

अङ्गुल्यादिप्रमाणं तु वीणादण्डादिनिर्मितम् ॥
तन्त्रीककुभतुम्बादिलक्षणं धारणं तथा ॥ १२ ॥

तद्वादने च व्यापारो वामदक्षिणहस्तयोः ॥
वैणिकादवगन्तव्यं नात्र शास्त्रप्रयोजनम् ॥ १३ ॥

प्रकृतिः सर्ववीणानामेषा स्यादेकतन्त्रिका ॥
सम्पन्ना सा तदन्यास्तु तस्याः प्रत्यङ्गमीरिताः ॥
एषैव कीर्त्यते लोके स्वरमण्डलसंज्ञया ॥ १४ ॥

---

11 सं. द. V. 542; 543 ab reads तालोऽथ for तालो । एतेऽन्ये च निदर्शनात्
for f.
सं. र. 6.15 reads तालोऽथ for तालो । कस्ना also for कम्रा ।
प्रभेदा घनवाद्यस्य प्रोक्ताः सोढलसूनुना ॥ for ef.

12 सं. द. V. 543 cdef reads अङ्गुल्यादिप्रमाणात्तु । for a.

13 „ V. 544 —

14 ab सं. द. V. 545 ab —
cf. सं. र. 6.53.
यत्राभिदधिरे धीरास्तां वीणामेकतन्त्रिकाम् ॥
प्रकृतिः सर्ववीणानामेषा श्रीशार्ङ्गिणोदिता ॥ ५३ ॥
Between ab and cd सं. द. reads the following lines :—
अनिबद्धा च सा लोके ब्रह्मवीणेति कथ्यते ॥ ५४५ ॥
सर्वदेवमयी तस्माद् वीणेयं सर्वमङ्गला ॥ (सं. र. 6.56 cd)
तन्त्रीद्वयेन नकुला स्यादन्वर्था त्रितन्त्रिका ॥ ५४६ ॥
नकुल :–सं. र. । (सं. र. 6.108 ab)
तन्त्रीभिः सप्तभिश्चित्रा विपञ्ची नवभिर्मता ॥ (सं. र. 6.108 cd)
कोणाङ्गुलीवादनेन चित्रा तद्वद्विपञ्चिका ॥ ५४७ ॥
वादनीया । सं. र. । (सं. र. 6.109 ab)
चित्रायामङ्गुलीमात्रं विपञ्च्यामुभयं परे ॥ (सं. र. 6.110 ab)
तन्त्रीणामेकविंशत्या कथिता मत्तकोकिला ॥ ५४८ ॥
(सं. र. 6.110 cd)
मुख्येयं सर्ववीणानां त्रिस्थानैः सप्तभिः स्वरैः ॥ (सं. र. 6.111 ab)

आलापिन्येकतुम्बा स्याद् दण्डः स्यान्नवमुष्टिकः ॥
खर्परं नालिकेरोत्थं दोरको दोरिका तथा ॥ १५ ॥

पटसूत्रमयी तन्त्री यद्वा कार्पाससूत्रजा ॥
रक्तचन्दनजान् सर्वान् वीणादण्डान् परे जगुः ॥ १६ ॥

तुम्बद्वयं च सर्वेषु वीणादण्डेषु योजयेत् ॥
आघाटीसंज्ञया लोके आलापिन्येव कीर्त्यते ॥ १७ ॥

किन्नरी द्विविधा लघ्वी बृहती च (प्र)कीर्तिता ॥
गृध्रवक्षोऽस्थिनलिका कनिष्ठाङ्गुलिसंमिता ॥ १८ ॥

---

cdef सं. द. V. 549 cd 550 ab reads ततो for तद् ।
cd सं. र. 6.111 cd reads सम्पन्नत्वात् for सम्पन्ना सा ।

15 सं. द. V. 550 cd 551 ab reads कर्परं for खर्परं । नारिकेलोत्थं for नालिकेरोत्थं ।

cd सं. र. 6.245 ab reads कर्परं for खर्परं । नारिकेलोत्थं also for नालिकेरोत्थं । दोरिकाः for दोरिका ।

16 सं. द. V. 551 cd 552 ab reads पट्ट for पट । सूत्रका for सूत्रजा ।
सं. र. 6.246 cd 247 ab reads मयीं तन्त्रीं for मयी तन्त्री ।
सूत्रजां for सूत्रजा ।

17 सं. द. V. 552 cd 553 ab reads आघाटि for आघाटी ।

18 ab सं. द. 553 cd reads प्रकीर्तिता for कीर्तिता ।
सं. र. 6.255 ab ,, चेति कीर्तिता for च प्रकीर्तिता ।
After 18 ab सं. द. reads the following lines :—

वितस्तित्रितयं दैर्घ्ये मानं पञ्चाङ्गुलाधिकम् ॥
लघ्वी दण्डस्य विस्तारः पञ्चाङ्गुल उदाहृतः ॥ ५५४ ॥

वितस्त्यभ्यधिका दण्डे बृहती परिकिर्तिता ॥

cf. सं. र. 6.256 & 274 cd.

स्याद्वितस्तित्रयं दैर्घ्ये मानं पञ्चाङ्गुलाधिकम् ॥
पञ्चाङ्गुलः परीणाहो वेणुदण्डस्य यत्र च ॥ २५६ ॥
वितस्त्यभ्यधिका दैर्घ्ये परिणाहेऽङ्गुलाधिका ॥ २७४ ॥

cd सं. द. 555 cd reads नालीका for नलिका ।
सं. र. 259 ab —

लौही कांस्यमयी यद्वा कर्तव्या (कीर्तिता) सारिकाक्ष(ख्य)या ॥
मधूच्छिष्टेन संश्लिष्टा दण्डपृष्ठे चतुर्दश ॥ १९ ॥
चतुर्दश स्वरस्थाने सारिका विनिवेशयेत् ॥
तुम्बानां त्रितयं चात्र तिर्यग् योज्यं तृतीयकम् ॥ २० ॥
शिष्टं ग्रन्थान्तरे ज्ञेयं मध्यमा या(चा)स्ति किन्नरी ॥
वादनादिप्रकारोऽपि ग्रन्थाद्वैणिकशिक्षया ॥
ज्ञातव्यो नात्र कथितो गुर्वधीनो यतोऽत्र सः ॥ २१ ॥
पिनाकी लोकतो ज्ञेया शास्त्रलक्षणलक्षिता ॥
तुम्बस्थितेन धनुषा वाद्यते सा विचक्षणैः ॥ २२ ॥
अश्वपुच्छस्थितैर्वालैर्गुणी वादनधन्वनः ॥
जानीयाल्लोकतोऽन्यानि ततवाद्यानि तत्त्वतः ॥ २३ ॥
नादश्रुतिस्वरग्रामजातिरागादितत्त्ववित् ॥
देहसौष्ठवसम्पन्नः स्थिरासनपरिग्रहः ॥ २४ ॥
जितश्रमस्त्यक्तभयः सुशारीरप्रगल्भधीः ॥
सावधानो **वैणिकः** स्याद् गीतवादनकोविदः ॥ २५ ॥

---

19 सं. द. 556 reads लौह for लौही । सारिकाख्यया for सारिकाक्षया ।
ab सं. र. 6.259 cd reads कीर्तिता सारिकाख्यया for b.
cf. सं. र. 260 ab for cd.
श्लिष्टा वस्त्रमषीमिश्रमदनेन चतुर्दश ॥
20 सं. द. 557 reads विनियोजयेत् for विनिवेशयेत् ।
cf. सं. र. 260 cd for ab.
चतुर्दश स्वरस्थाने दण्डपृष्ठे निवेशयेत् ॥
21 सं. द. 558, 559 ab reads चास्ति for यास्ति ।
22 ,, 559 cd 560 ab —
23 ,, 560 cd 561 ab —
cf. सं र. 6.407 cd for ab.
अश्ववालधिकेशोत्थो गुणो वादनधन्वनः ॥
24 सं. द. 561 cdef.
सं. र. 6.422
25 सं. द. 562 —
cf. सं. र. 6.423.

वंशः स्याद्वैणवो दान्तः खादिरश्चन्दनोऽथवा ॥
आयसः कांस्यजो रौप्यः कांसो(काञ्चनो)ऽप्यथवा भवेत् ॥
वर्तुलः सरलः श्लक्ष्णो ग्रन्थिभेदव्रणोज्झितः ॥ २६ ॥

तद्वद् (तस्य) द्वे त्रीणि चत्वारि चाङ्गुलानि शिरःस्थलात् ॥
त्यक्त्वा फूत्काररन्ध्रं तु कार्यमङ्गुलसम्मितम् ॥ २७ ॥

अर्धाङ्गुलान्तराणि स्यू रन्ध्राण्यन्यानि सप्त च ॥
तेषु च स्वरविन्यासः प्रकारो वादनस्य च ॥
भेदाश्च सर्वमेवैतद् विज्ञेयं ग्रन्थलोकतः ॥ २८ ॥

अष्टादशाङ्गुलोद्देशादेकैकाङ्गुलिवर्धितः(ताः) ॥
वंशाश्चतुर्दश स्त(स्यु) स्य(स्ते)उमापत्यादिसंज्ञया ॥ २९ ॥

अङ्गुलीसारणाभ्यासः स्वस्थानत्वं सुरागता ॥
गीतवादनदक्षत्वं गातॄणां स्थानदायिनी(ता) ॥ ३० ॥

जितश्रमकरद्वन्द्वस्त्यक्तभीर्निर्जितेन्द्रियः ॥
प्रगल्भधीः सुशारीरो गीतवादनकोविदः ॥
सावधानमनाश्चेति वैणिके वर्णिता गुणाः ॥ ४२३ ॥

26 सं. द. 563-564 ab reads काञ्चनो for कांसो ।
सं. र. 6.424-425 ab reads वैणवः खादिरो दान्तश्चान्दनो रक्तचन्दनः ॥
for ab. वंशः स्यात् काञ्चनोऽथवा for d.

27 सं. द. 564 cd 565 ab reads तस्य for तद्वत् ।
सं. र. 6.426 cd 427 ab ,, तस्य for तद्वत् । सुषिरं for रन्ध्रं तु ।

28 सं. द. 565 cd 566 —
ab सं. र. 6.428 ab —

29 सं. द. 567 reads अङ्गुलवृद्धितः for अङ्गुलिवर्धिताः । स्युस्ते for स्तस्य ।
cf. सं. र. 432 cdef 433 ab -

एकैकाङ्गुलवृध्द्या स्युरन्ये वंशाश्चतुर्दश ॥
अ(आ)ष्टादशाङ्गुलाद्वंशादेतदङ्गुलवर्धनम् ॥ ४३२ ॥
उमापतिर्व्यङ्गुलः स्यात् त्रिभिस्त्रिपुरुषोऽङ्गुलैः ॥

30 सं. द. 568 reads :—सु for स्व । दायिता for दायिनी ।
सं. र. 6.662 abef:—सु for स्व । दायिता for दायिनी ।

तद्दोषाच्छादनं मार्गदेशीरागेषु कौशलम् ॥
एवमादिगुणैर्युक्तो **वांशिकः** स्यादिहोत्तमः ॥ ३१ ॥

हस्तद्वयाधिका माने मुखरन्ध्रसमन्विता ॥
चतुःस्वरच्छिद्रयुता **मुरली** चारुवादिनी ॥ ३२ ॥

शृङ्गजा दारवी च (वा)स्यात् काहलाकृतिदारु(धारि)णी ॥
अष्टाविंशत्यङ्गुला च दैर्घ्ये **मधुकरी** मता ॥ ३३ ॥

तन्निर्माणप्रकारश्च रागोत्पत्तिस्ततो यथा ॥
तत्सर्वं लोकतो ज्ञेयं नात्र शास्त्रप्रयोजनम् ॥ ३४ ॥

ताम्रजा राजती यद्वा काञ्चनी सुषिरान्तरा ॥
धत्तूरकुसुमाकारा(र)वैदनेन विराजिता ॥ ३५ ॥

हाहूवर्णवती धीरबिरुदोच्चारकारिणी ॥
हस्तत्रयमिता दैर्घ्ये **काहला** वाद्यते जनैः ॥ ३६ ॥

करेणुवदनाकारवदने दोषवर्जितम् ॥
शृङ्गं तन्माहिषं स्निग्धं श्लक्ष्णं सुघटितं कृतम् ॥
विशेषस्त्वन्यतो ज्ञेयो वाद्यं गोपालकेलिषु ॥ ३७ ॥

---

31 सं. द. 569.
ab सं. र. 6.663.

32 सं. द. 570.
सं. र. 6.784 reads नादिनी for वादिनी ।

33 सं. द. 571 reads धारिणी for दारुणी ।
सं. र. 6.785 ,, वा for च । धारिणी for दारुणी । शुभा for मता ।

34 सं. द. 572 —

35 सं. द. 573 reads कार for कारा ।
सं. र. 6.792 reads कार for कारा.

36 सं. द. 574 reads विशुद्ध for बिरुद ।
सं. र. 6.793 ,, वीर for धीर, reads ab for cd and cd for ab.

37 सं. द. 575, 576 ab reads कारं for कार ।
abcd सं. र. 6.796 reads वदनं for वदने । श्लक्ष्ण for स्निग्धं ।
स्निग्धं for श्लक्ष्णं ।

निर्दोषश्चोश्चां(त्खा)तनाभेः(भिः) शङ्खश्चैकादशाङ्गुलः ॥
सुषिरं निर्मितं धातुसिकता(क्थका)भ्यां मनोरमम् ॥ ३८ ॥

रन्ध्रमष्टा(र्धा)ङ्गुलमितं सुषिरस्य मुखे भवेत् ॥
अन्ते तु माषमात्रं स्याच्छङ्खमेवंविधं सुधीः ॥ ३९ ॥

धृत्वा कर्कटहस्तेन भूरिश्वासभृतोदरम् ॥
हुम्भुन्थोन्दिगि(दि)त्येतद्वर्णा(ञ्)शङ्खेन वादयेत् ॥ ४० ॥

मार्गदेशीगतत्वेन **पटहो** द्विविधो भवेत् ॥
निर्माणकथनं तत्र(स्य)ज्ञातृत्वेनोपयुज्यते ॥ ४१ ॥

तदुपेक्ष्य ततः पाटाः कथ्यन्ते तत्तदुद्भवाः ॥
हस्तोद्भवास्त एवात्र हस्तपाटाः प्रकीर्तिताः ॥ ४२ ॥

सद्योजातादिपञ्चभ्यो मुखेभ्यः पार्वतीपतेः ॥
नागबन्धादयो जातास्तस्मान् मुख्याः प्रकीर्तिताः ॥ ४३ ॥

---

38 सं. द. 576 cd 577 ab reads निर्दोषस्योत्खातनाभेः for a। शङ्खस्यैकादशाङ्गुलम् for b। शिखरं for सुषिरं। सिक्थकाभ्यां for सिकताभ्यां।
सं. र. 6.799 reads निर्दोषस्योत्खातनाभेः शङ्खस्यैकादशाङ्गुलम्। for ab. शिखरं for सुषिरं। सिच्छ(क्थ)काभ्यां मनोहरम् for सिकताभ्यां मनोरमम्।

39 सं. द. 577 cd 578 ab अर्धा for अष्टा। शिखरस्य for सुषिरस्य।
सं. र. 6.800 cd 801 ab अर्धा for अष्टा। शिखरस्य for सुषिरस्य। अन्तः for अन्ते।

40 सं. द. 578 cdef reads थोंदिग्दिग for थोंदिगि। योजयेत् for वादयेत्।
सं. र. 801 reads थो for थों। दिगिदि for दिगि। दर्णोद्घोषेन for वर्णाञ् शङ्खेन।

41 सं. द. 579 reads तस्य for तत्र।
ab सं. र. 6.802 ab —

42 सं. द. 580 —
cf. सं. र. 6.825 cd for cd.
हस्तोद्भवाः पाटभेदा हस्तपाटाः प्रकीर्तिताः ॥

43 सं. द. 581 —

अष्टाशीतिरिमे हस्तपाटाः शास्त्रे प्रकीर्तिताः ॥

× साधाङ्गुलः स्यादुत्सेधः समा कार्या कृतिस्तथा ॥ ×

× गुरुत्वं च यथा ज्ञाये (नादो) भेदोभवे(भवे)च्छ्रुति(मनोहरः) ॥ ×

× तन्निर्माणप्रकारश्च रागोत्पत्तिस्ततो यथा ॥ ×

× तत्सर्वं लोकतो ज्ञेयं नात्र शास्त्रप्रयोजनम् ॥ ×

× ताम्रजा राजती यद्वा काञ्चनी सुषिरान्तथा(रा) ॥ ×

वनगिभगिननगिननगि ॥ १ ॥ दगिद्डगि ॥ २ ॥

गिडगिथद्थोम् ॥ ३ ॥ किटतल ॥ ४ ॥

नद्तुम् ॥ ५ ॥ खिरतकिट ॥ ६ ॥ द्थोङ्गिर ॥ ७ ॥

इति सद्योजातोद्भवाः ।

ततकिट ॥ १ ॥ थोहन्ता ॥ २ ॥ थोङ्गिनथोन्थोङ्गिन ॥ ३ ॥

---

44 ab सं. द. 582 ab —

cf. सं. र. 6.847 अष्टाशीतिरिमे हस्तपाटा निःशङ्ककीर्तिताः ॥

After ab 5 lines are wrongly inserted.

1-2 lines = V. 63 cd 64 ab.

3-4 ,, = V. 34.

5 ,, = V. 35 ab.

सङ्गीतदर्पणोक्ता हस्तपाटाः ।	सङ्गीतरत्नाकरोक्ता हस्तपाटाः ।
१ वनगिनगिननगि ।	१ टनगिन गिननगि इति नागवन्धः ।
२ दुगिडदगिथदथोंम् ।	२ ननगिड गिडदगि इति पवनः ।
३ गिडगिधादधै ।	३ गिडगिड दत्था इत्येकः ।
४ किटतत ।	४ किटनत २ इत्येकसरः ।
५ नदनु ।	५ नखु नखु इति दुःसरः ।
६ खर्रतकिट ।	६ खिरतकिट इति संचारः ।
७ थोंगि थोंगि ।	७ थोंगि थोंथि इति विक्षेपः ।
इति सद्योजातोद्भवाः ॥ १ ॥	इति सद्योजातोद्भवाः सप्त हस्तपाटाः ॥ १ ॥
१ ततकिट ।	१ ततकिठकि इति स्वस्तिकः ।
२ थोहन्ता ।	२ थो हंता इति वल्किोहलः ।
३ थोंगिन थोंथोंगिन ।	३ थोंगिन थोंगिन थोंगिन इति फुल्लविक्षेपः ।

चोन्थोङ्गोण्णोम् ॥ ४ ॥ थोङ्गिणतन्ता ॥ ५ ॥
किटथोन्थोङ्गिनखेङ्खेम् ॥ ६ ॥ टाकुडेण्डेम् ॥ ७ ॥

इति वामदेवोद्भवाः ।

ननगिडगिद्डगिदा ॥ १ ॥ दथरिक्किद्थरिकि ॥ २ ॥
तकिथिकितकिथिकि ॥ ३ ॥ टगनुखु ॥ ४ ॥ खिरिटखिरिट ॥ ५ ॥
खिरिखिरि ॥ ६ ॥ नरकिथराकि ॥ ७ ॥

इत्यघोरोद्भवाः ।

दरगिडगिडद्गिरा ॥ १ ॥ टकुरट्ठ ॥ २ ॥ ननगिनखरिखिरि ॥ ३ ॥
दखेङ्खेम् ॥ ४ ॥ थोङ्गिनगिथोङ्गिनगि ॥ ५ ॥ तत्ता ॥ ६ ॥
धिछिधि ॥ ७ ॥

इति तत्पुरुषोद्भवाः ।

---

४ थोंथों गोंगों ।
५ थोंगिणतत्ता ।
६ किटथों थोंगिन खेंखें ।
७ टकुडेंडें ।
इति वामदेवोद्भवाः ॥ २ ॥
१ ननगिडगिडदगिदा ।
२ दथरिकि दथरिकि ।
३ तकिधिकि ।
४ टगनुखु ।
५ खिरिर ।
६ खिरि खिरि ।
७ नरकि थरकि ।
इत्यघोरोद्भवाः ॥ ३ ॥
१ दरगिड गिडगिरा ।
२ टकुटट्टु ।
३ ननगिन खरि खिरि ।
४ दखें खें ।
५ थोंगिनगि थोंगिनगि ।
६ तत्ता ।
७ धिधि ।
इति तत्पुरुषोद्भवाः ॥ ४ ॥

४ थोंथों गोंगों इति कुण्डलीविक्षेपः ।
५ थोंगिणतत्ता इति संचारविलिखा ।
६ किटथोंथों गिनखेंखें इति खण्डनागबन्धः ।
७ टकु झेंझें इति पूरकः ।
इति वामदेवोद्भवाः सप्त हस्तपाटाः ॥ २ ॥
१ नग गिडगिड दगिदा इत्यलग्नः ।
२ दत्थरिकि दत्थरिकि इत्युत्सारः ।
३ तकि धिकि तकि धिकि इति विश्रामः ।
४ टगुनगु टगुनगु इति विषमखली विषमस्खलितो वा ।
५ खिरितु खिरितु इति सरी ।
६ खिरि खिरि इति स्फुरी ।
७ नरकित्थरिकि इति स्फुरणः ।
इत्यघोरोद्भवाः सप्त हस्तपाटाः ॥ ३ ॥
१ दरिगिड गिडदगिदा इति शुद्धिः ।
२ टटकुटट इति स्वरस्फुरणः ।
३ ननगिन खरिखरि इत्युच्छ्लः ।
४ दखें दखें दखें खे इति वलतः ।
५ थोंगिनगि थोंगिनगि इत्यवघटः ।
६ तत्ता इति तकारः ।
७ धिधि इति माणिक्यवल्ली ।
इति तत्पुरुषोद्भवाः सप्त पाटाः ॥ ४ ॥

तडेझेन्झेम् ॥ १ ॥ तिरिखुतिरिखु ॥ २ ॥ कणकणकि ॥ ३ ॥
धिधिकिटकी ॥ ४ ॥ दिगिनपि(गि) ॥ ५ ॥ थरकडथरकड ॥ ६ ॥
दोंनकट ॥ ७ ॥

इतीशानोद्भवाः ।

अत्रान्ये हस्तपाटास्तु ज्ञेया ग्रन्थान्तराद् बुधैः ॥ ४४ ॥
वाद्यप्रबन्धाः कथ्यन्ते पाटाक्षरविनिर्मिताः ॥
येषूद्ग्राहादिकं सर्वं ज्ञेयं गीतप्रबन्धवत् ॥ ४५ ॥
यतिरोता च गजरो रिगोणी कवितं पदम् ॥
मेलापकश्चोपशमोद्ग्राहप्रहरणान्यथ ॥ ४६ ॥
अवश्य(त्स)कश्छंद(श्छण्ड)णश्च तुडुपो मेलपं ततः ॥
इत्यादयोऽवपाटान्तास्त्रिचत्वारिंशदीरिताः ॥ ४७ ॥
तेषां लक्ष्यस्वरूपं च मर्दलादिषु वादनम् ॥
ज्ञेयं तरन्तरो(तदन्यतो) लोके कथ्यते मोहराख्यया ॥ ४८ ॥
यदेतत्तुडुकं प्रोक्तं तदद्दीत्यभिधीयते ॥ ४९ ॥

---

१ तडेनझें झें ।
२ तिरिखु तिरिखु ।
३ कणकणकि ।
४ धिधिकिटकि ।
५ दिगिनगि ।
६ थरकट ।
७ थों न कट ।

इतीशानोद्भवाः ॥ ५ ॥

१ तझें तझें झें इति ससस्खलितः समस्खली वा ।
२ गिरिगड गिरिण्ड इति विकरः ।
३ कणकणकि इति सदृशः ।
४ धिधिकिटकि इति खलीस्खलितोवा ।
५ दिगिनगि दिगिनगि इत्यड्डुखली अड्डुस्खलितो वा ।
६ थरकट थरकट इत्यनुच्छ्रः ।
७ दोंनकट दोंनकट इति स्रुतः ।

इतीशानोद्भवाः सप्त पाटाः ॥ ५ ॥

44 cd सं. द. 582 cd.

45 सं. द. 583.

46 सं. द. 584.
सं. र. 6.944 प्रकरणानि for प्रहरणानि ।

47 सं. द. 585. अवत्सकश्छण्डणश्च for a । तुडुका मलपं for तुडुपो मेलपं ।
ab सं. र. 6.945 ab अवत्सकश्छण्डणश्च । for a. तुडुका मलपं ततः for b.

48 सं. द. 586 तदन्यतो for तरन्तरो ।

49 Not traced.

निर्दोषबीजवृक्षो(त्थो) **मर्दलः** परिकीर्तितः ॥
रक्तचन्दनजो यद्वा खादिरोऽन्यैरयं मतः ॥ ५० ॥
विनिर्माणप्रकारोऽस्य पाटोत्पत्तिरतो यथा ॥
वादकश्च रसादिस्तु ज्ञेयं ग्रन्थान्तराद् बुधैः ॥ ५१ ॥

अथ मार्दलिकलक्षणम् ।

चतुर्विधो **मार्दलिको** वादको मुखरी तथा ॥
ततः प्रतिमुखर्याख्यस्तुर्यो गीतानुगो मतः ॥ ५२ ॥
वादकः शुद्धबटुकपर्यायः कथ्यते बुधैः ॥
मुखरीप्रतिमुखरीपर्यायो भार उच्यते ॥
गीतानुगस्य पर्यायः **श्रवणा** इति उच्यते ॥ ५३ ॥

ततो वादकशुद्धबटुलक्षणम् ।

वादको वादकर्ता स्याद्वादः पक्षपरिग्रहः ॥
स्वपक्षसाधनं तद्वत् परपक्षस्य दूषणम् ॥ ५४ ॥
वादे तु वादनं कार्यं प्रथमं त्रोटनादिकम् ॥
मर्दले तालसहितं वोहणेन विना ध्वनिः ॥ ५५ ॥

---

50 सं. द. 587 वृक्षोत्थः for वृक्षो ।
a सं. र. 6.1017 c —
cd ,, 6.1078cd —

51 सं. द. 588.

52 सं. द. 589.
सं. र. 1037 वादिको for वादको ।

53 सं. द. 590. 591 ab स्याच्छुद्धबटु for शुद्धबटुक । कथितो for कथ्यते । प्रेति for प्रति । डवणा also for श्रवणा । कथ्यते for उच्यते । तत्र for ततः ।

54 सं. द. 591 cd 592 ab —
सं. र. 6.1038 reads वादिको for वादको ।

55 सं. द. 592 cd 593 ab वादेषु for वादे तु । त्रोटनाभिधम् for त्रोटनादिकम् । मर्दलं for मर्दले ।
सं. र. 1039 cd 1040 ab :—च for तु । त्राटनाभिधम् for त्रोटनाभिधम् रहिते for सहितं ।
After 55 cd सं. र. reads यो देहुडडगित्यादिकृतोऽसौ त्राटनं मतम् ॥

शद्धप्रबन्धयत्यादिवादने तु प्रवीणता ॥
× सद्योजातादिपञ्चभ्यो मुखेभ्यः पार्वतीपतेः ॥ ×
× नागबन्धादयो जातास्तस्मान् मुख्याः प्रकीर्तिताः ॥ ×
चञ्चत्पुटादितालैस्तु मार्गषट्केन योजिताः (तः) ॥
कर्तरीसहिता(तो) यत्र वादकः स तु कथ्यते ॥ ५६ ॥

इति वादकबटुकशुद्ध(शुद्धबटुक)लक्षणम् ।

अथ मुखरीप्रतिमुखरीभारलक्षणम् ।

शब्दप्रबन्धाः(न्) सततं वादयेत् तालसंयुतः (तान्) ॥
वोहणेन विना यत्र मुखर्यादिक उच्यते ॥
स एव भारसंज्ञो हि कथ्यते हि (तु) विचक्षणैः ॥ ५७ ॥

इति मुखर्यादिभारलक्षणम् ।

अथ गीतानुगठवणालक्षणम् ।

मलापकं ततो वाजी नियमं वा यथाक्रमम् ॥
विचित्रशब्दकैर्व्यासं कालमानयुतं च यत् ॥ ५८ ॥
वोहणेन विना युक्तं रञ्जकं सर्वसौख्यदम् ॥
शुद्धसालकसंकीर्णं गीतं चातिमनोहरम् ॥
गीतानुगमिति प्रोक्तं ठवणा इति केचन ॥ ५९ ॥

इति गीतानुगठवणालक्षणम् ।

अथ (इति) चतुर्विधमार्दलिकलक्षणम् ।

---

56 ab Not traced. cf V. 43 for the two lines wrongly rcpeated here,
cdef सं. द. 594 योजित: for योजिताः । सहितो ior सहिता ।
शुद्धबटु for बटुकशुद्ध ।

57 सं. द. 595. 596 ab प्रबन्धान् for प्रबन्धाः । संयुतान् for संयुतः । -दिकमुच्यते for - दिक उच्यते । तु for हि ।

58 सं. द. 596 मेलापकं for मलापकं । तथा चाली for ततो वाजी । न्यासं for व्यासं । तत् for यत् ।

59 सं. द. 597, 598 ab समा for विना । सालक for सालग । संकीर्णगीतैः for संकीर्णं गीतं । डवणा for ठवणा ।

तत एवं हुडुक्कादिवाद्यस्यापि च लक्षणम् ॥
तथा निःसाणभेर्यादिलक्षणं ज्ञेयमन्यतः ॥
गुणदोषाश्च काष्ठस्य चर्मणश्च तथैव च ॥ ६० ॥

कांस्यादिनिर्मितं वाद्यं घनमित्यभिधीयते ॥
गृहीत्वा शुद्धकांस्यं तत् पूर्वमग्नौ विशोधयेत् ॥
तालद्वयं प्रकुर्वीत तस्य शास्त्रोक्तमानतः ॥ ६१ ॥

तालः स्याद् वर्तुलस्तत्र सपादद्व्यङ्गुलोन्नतः ॥
मध्योऽस्याङ्गुलविस्तारो निम्नो रन्ध्रं च मध्यम(ग)म् ॥ ६२ ॥

पादोनगुञ्जामात्रं स्यात् पि(ण्डस्तु यवमात्रकः) ॥
[सार्धाङ्गुलः स्यादुत्सेधः समकायाकृतिस्तथा ॥ ६३ ॥

गुरुत्वं च यथा नादो भवेच्छ्रुतिमनोहरः ॥
ज्ञातव्यं लोकतः सर्वं दोरिकाधारणादिकम् ॥ ६४ ॥

ईदृक् तालद्वयं कृत्वा तत्रैकं तिर्यगानतम् ॥
धृत्वा तस्याग्रभागेन मध्यमन्यस्य ताडयेत् ॥ ६५ ॥

---

60 सं. द. 598, 599 ab एव for एवं। ते for च।

61 सं. द. 599 cd 600 —

62 सं. द. 601 — व्यङ्गुलाननः for व्यङ्गुलोन्नतः। नाभौ for निम्नो। मध्यमे for मध्यमम्।

सं. र. 6.1171 – कांस्यजो वर्तुलस्तालः for a। – लाननः for लोन्नतः। निम्नगम् for मध्यमम्।

63 सं. द. 602. पिण्डस्तु यवमात्रकः। for b.
V. 63cd - 75 are taken from संगीतदर्पण.
सं. र. 6.1172. समा श्लक्ष्णशुभाकृतिः। for d.

64 सं. द. 603 —
cf. सं. र. 6.1173 ab for ab.
कार्या तथा यथा नादो भवेच्छ्रुतिमनोहरः ॥

65 सं. द. 604 —
ab सं. र. 6.1174 cd युगं for द्वयं। तालमेकमथाबलैः for b।
cd ,, 6.1177 cd —

शिवेन ताडयेच्छक्तिं न तु शक्त्या शिवं क्वचित् ॥
अल्पनादा भवेच्छक्तिर्भूरिनादः शिवो भवेत् ॥ ६६ ॥

वामेन धारयेच्छक्तिं शिवं दक्षिणपाणिना ॥
अश्वमेधफलं चैव प्राप्नुयाद् दोषमन्यथा ॥ ६७ ॥

देवता तुम्बुरुयुता शक्तौ शक्तिः शिवे शिवः ॥
द्रुतादिसिद्धस्तं नादमङ्गुलीभिर्विधारयेत् ॥
पाटानत्र विजानीयात् सर्वानपि विचक्षणः ॥ ६८ ॥

पद्मिनीपत्रसंकाशौ कांस्यताल(लौ)समाकृती ॥
त्रयोदशाङ्गुलौ वक्त्रे कर्तव्यौ द्व्यङ्गुलौ तले ॥ ६९ ॥

मध्येऽङ्गुलमिते निम्नौ लक्ष्यशेषं तु तालवित् ॥
झेन्झेक्किटादयः पाटा मुख्याश्चान्ये निदर्शनात् ॥ ७० ॥

नारदो देवता चात्र कथिता पूर्वसूरिभिः ॥
घण्टादिवाद्यजातस्य लक्षणं ज्ञेयमन्यतः ॥ ७१ ॥

गम्भीरनादमधुरं समं गीतादिरक्तिकृत् ॥
स्फुटप्रहारमित्यादिगुणैः स्याद्वाद्यमुत्तमम् ॥ ७२ ॥

---

66 सं. द. 605 —
cd सं र. 6.1178 ab नादो for नादा ।

67 सं. द. 606.
सं. र. 6.1179.

68 सं. द. 607, 608 ab.
abcd सं. र. 6.1180 – युग्मे for युता । शक्तिः शक्तौ for शक्तौ शक्तिः । सिध्यै for सिद्धः । नादधृतिरूर्ध्वाङ्गुलीकृता for d ।

69 सं. द. 608 cd 609 ab —
सं. र. 6.1182. नलिनी for पद्मिनी । तालौ for ताल । कांस्यजे for कर्तव्यौ ।

70 सं. द. 609 cd 610 ab —
सं. र. 6.1183. 1184, ab. मितौ for मिते । तयोरन्यत्तु तालवत् for b । पाटा झनकटा मुख्याः सन्ति पाटान्तराण्यपि ॥ for cd.

71 सं. द. 610 cd 611 ab. —
ab सं. र. 6.1184 cd — चात्रेत्युक्तं सोढलसूनुना for b ।

72 सं. द. 611 cd 612 ab —
cf. सं. र. 6.1209–1210.

हस्तपाटप्रहारज्ञो गीतवाद्यादिकोविदः ॥
लयतालकलाभिज्ञो गा(पा)त्राभिप्रेतवादकः ॥ ७३ ॥

समादिग्रहविज्ञश्च पाटज्ञो ध्वनितत्त्ववित् ॥
गीतवादनतत्त्वज्ञश्छि(नृत्यस्थच्छि)द्राच्छादनपण्डितः ॥ ७४ ॥

ग्रहमोक्षप्रदेशज्ञो गीतनृत्तप्रमाणवित् ॥
नादवृद्धिक्षयाभिज्ञ उत्तमो वादको भवेत् ॥
गुणैः कतिपयैर्हीनः सर्वैर्वा वादकोऽधमः ॥ ७५ ॥

इति वाद्याध्यायः ।]

रक्तं विरक्तं मधुरं समं शुद्धं कलं घनम् ॥
स्फुटप्रहारं सुलभं विघुष्टं च गुणैरिति ॥
दशभिः संयुतं वाद्यमुक्तं सोडलसूनुना ॥
अन्वर्थान्यत्र नामानि समं त्वष्टविधं मतम् ॥

73 सं. द. 612 cd 613 ab —

74 ,, 613 cd 614 ab —

75 ,, 614 cd 615 —

cf. सं. र. 6.1215–1219 for V. 73-75.

हस्तकोणप्रहारज्ञो गीतवादनकोविदः ॥
यतिताललयाभिज्ञः पाटज्ञः पञ्चसञ्चवित् ॥
दशहस्तगुणोपेतः पात्राभिप्रेतवादकः ॥
आतोद्यध्वनितत्त्वज्ञः समादिग्रहवेदिता ॥
गीतवादननृत्यस्थच्छिद्राच्छादनपण्डितः ॥
ग्रहमोक्षप्रदेशज्ञो गीतनृत्तप्रमाणवित् ॥
वाद्ये समस्तभेदज्ञो रूपरेखान्वितस्तथा ॥
उद्घट्टनपटुः सर्ववाद्यभेदविवेचकः ॥
नादवृद्धिक्षयापत्तिकोविदो वादको विदः (वरः) ॥
गुणैः कतिपयैर्हीनः सर्वैर्वा वादकोऽधमः ॥

॥ श्री ॥

॥ श्लोकार्धानुक्रमणी ॥

INDEX OF HALF VERSES